LAKṢMAṆA'S

# SŪKTIRATNAKOṢA

L. D. SERIES 89

GENERAL EDITORS

DALSUKH MALVANIA

NAGIN J. SHAH

*Edited By*

NILANJANA S. SHAH

Sanskrit Department

Gujarat College

Ahmedabad

L. D. INSTITUTE OF INDOLOGY AHMEDABAD-9

Jain Education International For Private & Personal Use Only www.jainelibrary.org

LAKṢMAṆA'S

# SŪKTIRATNAKOṢA

L. D. SERIES 89

GENERAL EDITORS
DALSUKH MALVANIA
NAGIN J. SHAH

*Edited By*
**NILANJANA S. SHAH**
Sanskrit Department
Gujarat College
Ahmedabad

L. D. INSTITUTE OF INDOLOGY AHMEDABAD-9

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*Printed by*
Shri Ramanand Printing Press
Kankaria Road,
Ahmedabad–22,
and Published by
Nagin J. Shah
*Director*
L. D. Institute of Indology
Ahmedabad-9

FIRST EDITION
October 1982

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लक्ष्मणकृतः

# सूक्तिरत्नकोषः

संपादिका
नीलाञ्जना सु. शाह

प्रकाशक :
लालभाई दलपतभाई भारतीय संस्कृति विद्यामंदिर अहमदाबाद-९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# PREFACE

The L.D. Institute of Indology has great pleasure in publishing, in book-form, Lakṣmaṇa's *Sūktiratnakoṣa* which was first printed in our Research Journal SAMBODHI Volume VIII (1980). Dr. Mrs. Nilanjanaben S. Shah has critically edited the text on the basis of two palm-leaf manuscripts, one belonging to the Hemacandrācārya Jñāna Mandir, Patan and another to the Śāntinātha Bhaṇḍāra, Cambay. She has prepared a verse-index; there in foot-notes it is pointed out as to which verse is ascribed to which author in different anthologies. Her introduction, specially written for this book, is interesting. Therein she describes manuscripts used, presents some information about the author, discusses sources of verses, gives a brief account of other Jaina Subhāṣita Saṅgrahas and finally evaluates the *Sūktiratnakoṣa.* We are thankful to Dr. Mrs. N. S. Shah for undertaking the editing of this work.

It is hoped that students and scholars of Sanskrit literature will find this *Sūktiratnakoṣa* interesting.

L. D. Institute of Indology
Ahmedabad-380 009
2nd October 1982

**Nagin J. Shah**
Director

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# INTRODUCTION

## Description and Peculiarities of the two Manuscripts consulted:

The present text of *Sūkti-Ratna-Koṣa* has been edited from the photostat copies of the two Mss, one from patan and another from Khambhat.

The details about the Mss. are as follows :

P (प) :- This is a palm-leaf Ms stored in the Hemachandra Jñāna Mandir of Patan bearing no. 160. The size of Ms is 13½"X1½". It contains 66 folios with 3 lines on each page. Folios 20–23 42–46, and 51 are missing. The left portion of first five folios is worn out. The date of copying is the beginning of thirteenth century of VikramSaṁvat. The extent of the work as stated in the colophon is 680 verses. In this Ms. the title Sūktasaṁgraha is given.

The work comprises 68 sections as given in this Ms. A few marginal notes on difficult words are found in the folios 1–24. At one place, one whole verse has been quoted in order to clarify a Subhāṣita (verse 344). At times it has given deśya words as synonyms e. g. the word *'pralūpī'* is explained by *'jhaṅkhaṇa'*. Four verses (155–390; 163–543; 164–614; 381–619), of course occurring in different sections are repeated. One peculiarity of this Ms is that it has separated the section of *'Virahī'* from that of *'Virahiṇī'*. This Ms ends with the last section, therefore the autobiographical details about the author are missing.

KH (ख) :- This Ms is a palm–leaf Ms stored in the Śāntinātha Bhaṇḍāra of Khaṁbhāt bearing no 265(1). The size of the Ms is 13"X17". It contains 1–36 folios with 4 to 6 lines on a leaf. The date of copying of this Ms is the first half of the 15th century of Vikram Saṁvat. The Extent of the work acc. to this Mss is 613 verses.

According to this Ms. the work is divided into 61 sections. The difference between the two Mss. is significant. The section on 'Virahī' is included under that on 'Virahinī' while no separate heading is given to verses on 'dvika'. They are included in the section on 'Daridrī'. The section regarding 'Tapasvin', 'Haṃsa', 'Bhṛṅga' 'Abhisārikā' and 'Dūtīpreṣaṇa' are not found in the text accordtng to this Ms. Not only that certain sections in this Ms fall short by on one or two verses in comparison to those found in Patan Ms. This Ms has carefully avoided the repetition of the verses. Chronologically, this Ms is of a later date than the Patan Ms. but it is more valuable, as no leaf is missing and it supplies at least some information about the author. The title of the text has been given as Sūkti-Ratna-Koṣa.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**Author :**

There is no doubt about the authorship of Sūkti-Ratna-Koṣa. The Ms. from Patan clearly ascribes the authorship to Lakṣmaṇa and that from Khambhata confirms it, in the concluding verses. In the last eight verses, Lakṣmaṇa has given some information, of course, not satisfactory, about himself. Our author's great grandfather was Sarvadeva, a brahmin belonging to Udīcya family. He was prominent among the brahmins and was accomplished in all arts. His son Haṃsa was the grandfather of Lakṣmaṇa. Haṁsa's son Atyuttama was Lakṣmaṇa's father. The name of his mother was Nyāyinī. She was a very chaste woman. In this verses, the author claims that he collected these verses with a view to make the readers or the listeners smile i. e. brighten them by their strikingness, of course, the verses have several other sentiments besides humour, e.g cerain sections, of the anthology are such as would arouse scorn, compassion etc; as the section on Śānta or the one on Virahī or that on 'Virahiṇī'. Some other sections are purely descriptive.

Nowhere in the history of Sanskrit literature, do we find any reference to Lakṣmaṇa, the son of Haṁsa, as the author of *Sūkti-Ratna-Koṣa.* Shri Krishnamachariar (History of Sanskrit Literature, p. 390) has recorded one Lakṣmaṇa of the eighteenth century as the author of *Sūktāvali.* But he seems to be different from our Lakṣmaṇa.

In *Subhāśitāvali* (SV) and *Saduktikarṇāmṛta* (=SKM) verse no 216 is ascribed to Lakṣmaṇa. Of course, we have no means to ascertain whether he was this Lakṣmaṇa or other. This anthology pays homage to Jina in the opening verses. The Section on Jinaśtuti comprises seven verses. There fore it is quite evident that the compiler is a Jaina by faith, but he follows compilations by non-Jaina authors.

**The Text :**

The work here presented is an anthology of Sanskrit Sūktis compiled by Lakṣmaṇa. This work by Lakṣmaṇa is mentioned in P. Peterson's Third Report (A. p. 54) under the name of *SūktaSaṁgraha.*

This anthology is divided into 68 sections and contains 651 Subhāṣitas. The section on Nīti is the longest and it comprises 66 verses. The sections on 'Virahī' and 'Virahinī' taken together cover 70 verses, while the sections on 'Nṛpa' and 'Śānta' have 39 verses each. The rest of the sections are rather short.

Out of these 651 sūktis, the compiler attributes only the following 20 verses to their authors. Verse 88 is attributed to Vidyāpati, verses 110-112

Jain Education International For Private & Personal Use Only www.jainelibrary.org

are ascribed to Chittapa, verses 117–118 to Someśvara, verses 119 to Vāhaḍa, verses 313–322 to Vālmīki, verses 473–474 to Trivikrama and verses 484 to Vararuci.

The verse here attributed to Vidyāpati is found in anthologies without any ascription. At the same time it is verv difficult to identify Vidyāpati. Several verses occurring in the anthologies are ascribed to Vidyāpati. The verses attributed to Chittapa are not found in the anthologies consulted. According to the editers of Subhāṣita–Ratna–Koṣa (SrK), Chittapa was a court poet of King Bhoja of Dhārā and of some Kalacuri king of his time. Most of the Chittapa's Stanzas quoted in the well–known Sanskrit anthologies are replete with court–flattery. The verses here ascribed to Chittapa are not found in any of the prominent Sanskrit anthologies. Therefore this anthology should be given credit for bringing to light three verses of Chittapa, perhaps not noted elsewhere.

Verses attributed to Someśvara are not traceable in the extant work written by the authors bearing that name. The verse 119 ascribed to Vāhaḍa is not found as such in any of the works of two Vāhaḍas known so far, viz, Vāgbhaṭa, the author of Vāgbhaṭālaṁkara and Vāgbhaṭa, the author of Kāvyānuśāsana. The section on rainy season contains 17 verses (312–328). Out of these, 10 have been ascribed to Vālmīki. But only two (315, 322) could be traced to the Kiṣkindhākāṇḍa in the critical edition of Rāmāyaṇa, while two verses 316 and 320 are found in the popular edition of two Rāmāyaṇa.

Two verses ascribed to Trivikrama are found in his work, Nalacampū. The verse here attributed to Vararuci is also found in *Sūktimuktāvali* (SMV –48–4), *Śārṅgadharapaddhati* (SP-3506) and SV(1434) with the same ascription.

We do not know which Vararuci is here referred to out of the several writers known to bear that name, such as Vāraruci alias Katyāyana, the author of Vārtikas, Vararuci, the author of Prakrit grammar or Vararuci, the pre–Daṇḍin writer on Alaṁkāra : (Ref. : History of Sanskrit Poetics, I, p. 70)

Yet a majority of verses in this anthology are left without ascriptions, but in other anthologies they are ascribed to their authors. These ascriptions have been shown in the footnotes in the verse–index. One should not put too much reliance on those ascriptions which are unsupported by other information, because sometimes, the same verse is attributed to different poets in different anthologies.

Though the compiler has not indicated the source of the verses, we are able to find out the sources of forty verses in about twelve works, viz,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

the *Bhagavadgita*, Vālmīki-*Rāmāyaṇa* (in the case of verses other than those indicated by the Mss), *Vikramorvaśīya Amaruśataka*, the *Śatakas* of Bhartṛhari, *Kāvyālaṁkāra* of Bhāmaha, *Kāvyādarśa* of Daṇḍin, *Mṛcchakaṭika* of Śūdraka, *Ratnāvālī* and *Nāgānanda* of Śrīharṣa, *Harṣa-carita* of Bāṇa, *Anargharāghava* of Murāri, and *Viddhaśālabhañjikā* of Rājaśekhara. We have indicated the sources in square brackets in the text.

It is not possible to determine the exact date of the compilation of this anthology. Among the authors quoted in the text by the compiler and those traced by us, chronologically, Trivikrama stands last. He flourished in the tenth century A.D. This may be taken as the upper time limit of the compiler of this anthology. The earliest MS of this work has been assigned to the thirteenth century V. S. Thus we may surmise that this anthology was compiled somewhere between the tenth and the thirteenth century.

An attempt has been made to compare this anthology with five outstanding Sanskrit authologies viz, Srk of Vidyākara (1130 A. D.) SKM of Śrīdharadas (1205 A.D.), SMV of Jalhaṇa (1258 A. D.), SP of Sarṅgadhara (1363 A.D.), and SV of Vallabhadāsa (not earlier than 15th century). On comparison, it is found that this anthology has 254 verses common with Sv, 129 verses common with SP, 69 verses common with SMV, 37 common with SRK and 14 verses common with SKM.

**Other Jaina Subhāṣita Saṅgrahas :**

As this Sūkti-Ratna-Koṣa is compiled by Lakṣmaṇa, a Jaina author, it will not be out of place here to refer to other Sanskrit Subhaṣita Saṁgrahas by Jaina authors. Subhaṣita saṁgrahas written by Jainas are non-jainistic in character and contain mostly non-jainistic teachings. They pay homage usually in invocations to Jina in the opening verses. But this is a general, usual type of the anthology of *Subhāṣitas* and as such there is nothing specially Jainistic about it.

Notable among the printed Jaina Subhāṣita-Saṁgrahas are the following ones :

*Sūktamuktāvalī* compiled by some Pūrvācārya is an anthology divided into 27 sections and contains 2030 Subhāṣitas mostly written in Sanskrit but some also in Prakrit.

*EkādeśavaranibaddhaUpadeśa* is also an anthology of 98 verses, collected by a Jaina Sādhu. *Śuktamuktāvali* of Meghaprabhasūri and *Sūktaratnāvali* of Vijayasenasūri (containing 54 Subhaṣitas) are also worth noting among the Jaina Subhāṣita Saṁgrahas. The *Anyoktimuktāvali* of

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Haṃsavijayagaṇi and *AnyoktiŚataka* of Darśanavijayagaṇi are collections of *anoyktis*. *Anyoktimuktāvali* is divided into 8 *paricchedas* and contains 1199 verses. This anthology was written in A.D. 1679.

Besides these many Jaina Subhāṣita–Saṃgrahas are preserved only in manuscripts. A modern compilation in five volumes viz. *Subhāṣitā-padya-ratnākara* (published in A. D. 1933–37) contains 4065 verses. This is an excellent selection of Jainistic Subhāṣitas with an explanation in Gujarati on Jaina doctrine and teachings from Jaina Sources.

In the Jaina gnomic and didactic Subhāṣita literature also we come across some works of this type. These works are written by Jainas to promote Jaina teachings and propagate Jaina ethics. Among them Amitagati's *Subhāṣita-ratna-Saṁdoha* (A.D. 993–994), is specially noteworthy. This anthology is didactic as far as it proclaims the ethics of Digambara Jainas for laymen and monks and polemic as far as it contains criticisms of Brahmanical rules of conduct. It contains 922 Subhāṣitas and is divided into 32 sections. '*Sṛṅgāravairāgyataraṅginī*' of Somaprabha is a didactic Jain poem. Most of the verses in this work teach Jaina ethics and are expressed in ascetic spirit, but real Subhāṣitas are also found here in sufficient number.

*Sūktimuktāvali*, or better known as '*Sindūraprakara*' is written by Somaprabha, probably another than the author of '*Sṛṅgāra-vairāgyataraṅgiṇī*' Somaprabha has proclaimed in 99 verses written in different metres, the Jaina teachings in a form of stray verses of which many can be considered as Subhāṣitas. There exist also other didatic Jaina poems as well as other numerous writings which contain intermingled gnomic sayings both on morality and on worldly wisdom.

Thus the so-called Jaina Subhāṣita saṁgrahas, although collected by Jaina authors were usually collections of stray verses culled not only from Jaina authors, but also from non-Jainistic sources, as well as from the floating mass of oral tradition. As such they were of general application.

This *Sūkti–Ratna–Koṣa* by Lakṣmaṇa belongs to this type. Lakṣmaṇa as a devout jaina, pays homage to Jina in the opening verses. He did not cull the verses included in *Sūkti–Ratna–Koṣa* from Jaina authors, nor did he intend to teach Jaina doctrines; therefore the whole work has seldom a Jaina character. Almost All the verses included in this anthology could very well fit in any non-Jaina Subhāṣia–Saṁgrahas.

This anthology contains some well-known and current sayings as well as some verses little known as quite unknown to other Subhāṣita–Saṁgrahas. We must credit Lakṣmaṇa with literatry judgment of a high order in selecting stanzas for his anthology. Lakṣmaṇa claims that he is presenting

Jain Education International For Private & Personal Use Only www.jainelibrary.org

a treasure of Subhāṣitagems, but if we examine the nature of the stanzas. we find that a good many of them are Subhāṣitas in the sense of epigrams (e.g. in stanzas in sections pertaining to Nīti, Daridrī, etc.). There are besides these many other stanzas which are purely descriptive (e.g.–The stanzas in the sections on Varṣā, Sarat, Hemanta, etc.). It indicates the good taste of Lakṣmaṇa that he has refrained from selecting erotie verses offeending to good taste, though the sections on Strīpraśaṁs, Vāirahī and Virahiṇī taken together (107 verses) occupy almost one–sixth of the text.

The edited text includes all the verses that occur in either of the Mss. including those verses that have been repeated in different sections. Thus total verses in this edition are 651 plus 8 more verses pertaining to the author. The variant readings are given of course, as strictly as possible in accordance with the manuscript sources. But when the manuscripts differ, I have accepted the reading that is found in the Patan Ms. As noted above, many verses of this anthology are common with the verses of other anthologies. But some verses, do not exactly tally with their counterparts in other anthologies. We can find some variants in the text which are not found elsewhere.

I am thankful to Pandit Shri Dalsukhbhai Malvania, Dr. H. C. Bhayani Dr. N. J. Shah (Director of the L. D. Institute of Indology, Ahmedabad), Dr. H. G. Shastri, Pandit Amratlalji, Dr. N. M. Kansara and Shri Laksmanbhai for the kind help rendered by them in connection wiih the manuscripts utilised by me.

Gujarat College
Ahmedabad
15–6–82

**Nilanjana S. Shah**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## BIBLIOGRAPHY

(1) Anargharāghava of Murāri
Nirṇayasāgar Press, Bombay 1900

(2) Catalogue of Palm-leaf manuscripts in Sāntinātha
Jain Bhandara, Cambay, G.O.S. Baroda 1966

(3) Harṣacarita of Bāṇabhaṭṭa
Edited by Dr. P. V. Kane, Delhi, 1965

(4) History of classical Ṣanskrit Literature
by M. Krisnamachariar, Delhi 1970.

(5) Nāgānanda of Sri Harṣaḍeva,
Edited by Prof. Asha V. Torasker, Bombay, 1952.

(6) Nalacampū of Trivikrama Bhaṭṭa
Edited by Kailasapati Tripathi, Benaras, 1967.

(7) Ratnāvalī Edited by Deodhar and Suru, Poona, 1925.

(8) Śārṅgadharapaddhati
Edited by P. Peterson, Bombay, 1988.

(9) Śatakatrayādi Subhāṣitasaṁgraha of Bhartṛhari,
Edited by D. D. Kosambi, Bombay, 1948.

(10) Sadukti-Karṇāmṛta by Srīdharadāsa,
Edited by S. C. Banerji, Calcutta, 1965.

(11) Subhāṣita Saṁgrahas and Gnomic Subhāṣita literature by Ludwik Sternbach.

(12) Subhaṣitāvali of Vallabadeva
Edited by P. Peterson, Bombay, 1886.

(13) Subhāṣita-Ratna-Koṣa by Vīdyākara
Edited by D. D. Kusambi, Haruard Oriental Series, 1957.

(14) Sūkti-Muktāvali of Jalhaṇa,
Gaekwed Oriental Series, Baroda, 1938.

(15) The Valmīki-Rāmāyaṇa,
Critical Edition, Vol. III, Oriental Institute, Baroda, 1993.

(16) The Vālmīki-Rāmāyaṇa
Critical Edition, Vol. IV, Oriental Institute, Baroda, 1968.

(17) The Vālmīki Rāmāyaṇa
Gīta Press, Gorakhpur, 1964.

(18) Vīddhaśālabhañjīkā of Rājaśekhara Calcutta, 1943.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# शुद्धि पत्रम्

| पृष्ठम् | श्लोक | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ३ | २३ | ज्जवलाः । | ज्ज्वलाः । |
| ७ | ७१ | श्रन्यो | श्रान्यो |
| ७ | ७६ | जनयत्य | जनयन्त्य |
| ८ | ८३ | भृत्यवः | मृत्यवः |
| ९ | ९३ | क्षत्रियवाय | क्षत्रियदेवाय |
| ९ | १०० | मौन समाचार । | मौनं समाचर । |
| १० | १०४ | त्यज्यत्या | त्यजत्या |
| १४ | १५२ | स्याश्रुत | स्य श्रुत |
| १४ | १५८ | गामिना । | गामिनी । |
| १५ | १६० | यत्रामितो | यत्राभितो |
| १६ | १७३ | तल्नाः | तन्व्याः |
| १६ | १७८ | पुत्रपु | मूत्रपु |
| ३२ | ३८३ | व्याध्री | व्याघ्री |
| ३२ | ३८४ | वर्षै त्रिभि | वर्षैस्त्रिभि |
| ३३ | ३९६ | शम्भुः तथा | शम्भुस्तथा |
| ३६ | ४३६ | शस्त्रा | शास्त्रा |
| ३७ | ४४५ | तालस्त | तालः स्त |
| ३९ | ४७० | रापिता | रोपिता |
| ४१ | ४९८ | अतिविश्व | याति विश्व |
| ४२ | ५०१ | यादृशी ॥ | यादृशीम् ॥ |
| ४२ | ५१० | दुर्णनाभः | दूर्णनाभः |
| ४२ | ५११ | गुणोद्वारः | गुणोद्भारः |
| ४२ | ५११ | उर्ण | ऊर्ण |
| ४७ | ५६३ | नमश्च स । | नमश्चराः । |
| ५५ | ६५४ | श्रद्धाधीयत | श्रद्दधीयत |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# विषयानुक्रमणिका


| विषयः | श्लोकाङ्कः | श्लोकसंख्या |
|---|---|---|
| १ मङ्गलम् | १ | १ |
| २ जिनस्तुतिः | १–७ | ६ |
| ३ हरः | ८–१९ | १२ |
| ४ हरिः | २०–२७ | ८ |
| ५ कविः | २८–४१ | १४ |
| ६ काव्यम् | ४२–४९ | ८ |
| ७ सुजनः | ५०–५९ | १० |
| ८ खलः | ६०–८४ | २५ |
| ९ समस्याः | ८५–१०२ | १८ |
| १० नृपः | १०३–१४१ | ३९ |
| ११ शान्तः | १४२–१८० | ३९ |
| १२ स्त्रीप्रशंसा | १८१–२१७ | ३७ |
| १३ विरहिणी | २१८–२३० | १३ |
| १४ विरही | २३१–२८७ | ५७ |
| १५ योगी | २८८–२९८ | ११ |
| १६ सिंहः | २९९–३११ | १३ |
| १७ वर्षा | ३१२–३२८ | १७ |
| १८ नीतिः | ३२९–३९४ | ६६ |
| १९ कृपणः | ३९५–४०६ | १२ |
| २० दैवम् | ४०७–४१६ | १० |
| २१ वैद्यकम् | ४१७–४२५ | ९ |
| २२ वीरः | ४२६–४४० | १५ |
| २३ प्रकीर्णकम् | ४४१–४६३ | २३ |
| २४ पुत्रः | ४६४–४७४ | ११ |
| २५ सख्युपहासाः | ४७५–४८४ | १० |
| २६ हास्यम् | ४८५–४९५ | ११ |
| २७ चाटुपद्धतिः | ४९६–५०३ | ८ |
| २८ गुणाः | ५०४–५११ | ८ |
| २९ तपः | ५१२–५१८ | ७ |
| ३० तपस्विनः | ५१९ | १ |
| ३१ विद्या | ५२०–५२१ | २ |
| ३२ माया | ५२२–५२३ | २ |
| ३३ तृष्णा | ५२४–५२७ | ४ |
| ३४ उदारः | ५२८–५३३ | ६ |
| ३५ रविः | ५३४–५४० | ७ |
| ३६ सरः | ५४१–५४२ | २ |
| ३७ मृगः | ५४३–५४४ | २ |
| ३८ धनिनः | ५४५–५५२ | ८ |
| ३९ दरिद्री | ५५३–५५४ | २ |
| ४० द्विकम् | ५५५–५६१ | ७ |
| ४१ स्वानुभवः | ५६२–५६६ | ५ |
| ४२ वसन्तः | ५६७–५७५ | ९ |
| ४३ ग्रीष्मः | ५७६–५७८ | ३ |
| ४४ मेघः | ५७९–५८२ | ४ |
| ४५ शरत् | ५८३–५८६ | ४ |
| ४६ हेमन्तः | ५८७–५९१ | ५ |
| ४७ चातकः | ५९२–५९३ | २ |
| ४८ बकः | ५९४ | १ |
| ४९ हंसः | ५९५ | १ |
| ५० कोकिलः | ५९६–५९७ | २ |
| ५१ अगस्तिः | ५९८–६०० | ३ |
| ५२ कमलम् | ६०१–६०४ | ४ |
| ५३ भृङ्गः | ६०५ | १ |
| ५४ समुद्रः | ६०६–६१२ | ७ |
| ५५ शृङ्गारः | ६१३ | १ |
| ५६ अद्भुतः | ६१४–६१५ | २ |
| ५७ नृपोपलम्भः | ६१६–६१७ | २ |
| ५८ अभिसारिका | ६१८–६१९ | २ |
| ५९ दूतीप्रेषणम् | ६२० | १ |
| ६० पृथ्वी | ६२१–६२२ | २ |
| ६१ सोमः | ६२३–६२६ | ४ |
| ६२ नगरम् | ६२७–६२९ | ३ |
| ६३ प्रभातम् | ६३०–६३३ | ३ |
| ६४ प्रदोषः | ६३३–६३९ | ७ |
| ६५ श्रीः | ६४० | १ |
| ६६ कर्म | ६४१–६४७ | ७ |
| ६७ सुरतम् | ६४८–६४९ | २ |
| ६८ दयितस्यागमनम् | ६५०–६५१ | २ |
| | | ६५१ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लक्ष्मणकृतः

# सूक्तिरत्नकोषः

**नम : सरस्वत्यै ।***

1 सूक्तरत्नसुधासिन्धुं ध्यात्वा श्रीश्रुतदेवताम् ।
सूकतानां सङ्ग्रहं चक्रे लक्ष्मणो लक्षसूक्तिकः ॥ १

**अथ जिनस्तुतिः ।**

2 जिनः स पातु नाभेयो येन चामीकरछविः ।
क्षिप्तो विशुद्धये कायस्तपस्तीव्रहुताशने ॥१

3 चित्रं यत्रापरागेऽपि केवलज्ञानभास्करः ।
अजस्रमुदयं धत्ते जिनेन्द्रः सोऽस्तु नः श्रिये ॥२

4 जिनः स जयताद्देवः संसारलवणार्णवे ।
तपसा ज्वलता यस्य वाडवज्वलनायितम् ॥३

5 नाभेयः पातु वो यस्य केवलज्ञानदर्पणे ।
अमूर्तान्यपि विश्वानि भान्ति व्यवहितान्यपि ॥४

6 श्रीमतो वृषभस्यास्तु दर्शनं मङ्गलाय वः ।
यद्गवीब्रह्मनिघ्नापि परं वृषमसूयत ॥ ५ ॥

7 सागसामिव केशानां दशमद्वाररोधिनाम् ।
यः समुन्मूलनं चक्रे स वीरः पातु वो जिनः ॥६

**अथ हरः ।**

8 स शिवः पातु वो नित्यं गौरी यस्याङ्गसंगता ।
आश्लिष्टा हेमवल्लीव राजते राजते द्रुमे ॥१

---

* नमः सर्वज्ञाय ।

2 ख. प्रतौ अयं श्लोकः तृतीयः वर्तते ॥

4 ख. जयतां देवः ।

5 श्लोकस्य पूर्वार्धः पप्रतौ पत्रस्य खण्डितत्वान्नष्टः ।

6 प.प्रतौ 'ब्रह्म' इति शब्दानन्तरं पत्रं खण्डितमतः श्लोकभागस्ततः परो नष्टः ।

7 प. 'दशमद्वाररोधेन केशानां सागसामिव'। 'सापराधानामिव' इति प.प्रतौ टिप्पणी ।

8 प. प्रतौ शिव इति शब्दानन्तरं पत्रं खण्डितमतः 'पातु...... सङ्गता'पर्यन्तः श्लोकभागः नष्टः । रूप्यद्रुमे इति प.प्रतौ टिप्पणी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

9 स शिवः पातु वो नित्यं विशिखानलदीपितम् ।
आरात्रिकमिव भ्रान्तं यस्योपरि पुरत्रयम् ॥२

10 पायाद्वः शितिकण्ठस्य तमालश्यामलो गलः ।
संसक्तपार्वतीबाहुसुवर्णनिकषोपलः ॥३

11 पायाद्वः शितिकण्ठस्य कण्ठः श्यामाम्बुदोपमः ।
गौरी भुजलता यत्र विद्युल्लेखेव राजते ॥४

12 स धूर्जटिजटाजूटो जायतां विजयाय वः ।
यत्रैकपलितभ्रान्तिं करोत्यद्यापि जाह्नवी ॥५

13 आलम्बितजटाजालमुद्यदिन्दुकलाङ्कुरम् ॥
चराचरसमुत्पत्तिबीजं जयति धूर्जटिः ॥६

14 लग्नः शिरसि शीतांशुर्मग्ना वपुषि पार्वती ।
स्मरास्त्रमिव यस्याजौ स स्मरारिर्पुनातु वः ॥७

15 स शिवः वो शिवं दद्याद्यन्मूर्ध्नि विकटा जटाः ।
गङ्गासलिलसेवालमालालीलां वितन्वते ॥८

16 सगजास्येन्दुनन्दिस्तादगजास्येन्दुनन्दि वः ।
अनङ्गदाहि माहेशं साङ्गदाऽहिमुदे वपुः ॥९

17 चाटुमन्त्राक्षरं कण्ठे करे कुचकमण्डलुम् ।
बिभ्रतः पार्वतीभर्तुरहो व्रतमखण्डितम् ॥१०

18 स्तनौ तुम्बीफलद्वन्द्वं कृत्वेवोरसि पार्वती ।
अगाधं मानसं शंभोर्विविक्षुरिव लक्ष्यते ॥११॥

19 स वः पातु शिवः शश्वत् यत् प्रपञ्चमहोदधौ ।
उन्मज्जन्ति विपद्यन्ते ब्रह्माद्या बुद्बुदा इव ॥१२

---

9 प.प्रतौ 'यस्योपरि' शब्दानन्तरं पत्रं खण्डितम् ।
10 प.प्रतौ 'पायाद्वः' श्लोकभागः पत्रस्य खण्डितत्वान्नष्टः इति ।
13 प.प्रतौ पत्रस्य खण्डितत्वात् अस्य श्लोकस्य पूर्वार्धे 'दिन्दुकला' इतिपर्यन्तः नष्टः ।
14 प.प्रतौ श्लोकस्य उत्तरार्धे 'यस्या' इतिशब्दानन्तरं श्लोकभागः नष्टः ।
15 प. प्रतौ पत्रस्य खण्डितत्वात् आद्यः 'स' इति वर्णः नष्टः ।
16 प. प्रतौ उत्तरार्धे 'अनङ्गदाहि माहे' इति श्लोकभागः नष्टः ।
18 प. स्तने । प. प्रतौ 'वोरसि पार्व' इति पर्यन्तः श्लोकभागः नष्टः । 'प्रवेशमिच्छु' इति टिप्पणी प. प्रतौ ॥
19 ख. उत्पद्यन्ते विपद्यन्ते । 'अनवरत' इति प. प्रतौ·टिप्पणी ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ हरिः ।

20 श्रियं दिशतु वः शश्वन्नाभ्यमम्भोरुहं हरेः ।
यस्मिन्नोङ्कारझङ्कारी विधिर्मधुकरायते ॥१

21 स पातु वो हरिर्येन कुर्वता बलिबन्धनम् ।
आत्मानं वामनीकृत्य सुरा नीताः समुन्नतिम् ॥२

22 जयन्ति नरसिंहस्य स्फुरन्नखशिखाः कराः ।
हिरण्यक्रोधकृष्टेन्दुकलाखण्डैरिवाङ्किताः ॥३

23 सोऽव्याद्वो वामनो यस्य कौस्तुभप्रतिबिम्बिता ।
कौतुकालोकिनी जाता जाठरीव जगत्त्रयी ॥४

24 लक्ष्मीकपोलकान्तसंक्रान्तपत्रलतोज्ज्वलाः ।
दोर्द्रुमाः पान्तु वः शौरैर्घनच्छायासदाफलाः ॥५

25 हरेर्वराहरूपस्य जीयात्तुण्डमण्डलम् ।
यद्दंष्ट्राचन्द्रखण्डे भूलाञ्छनछविरुर्वरा ॥६

26 हृदयं कौस्तुभोद्भासि विष्णोः पुष्णातु वः श्रियम् ।
राधाप्रवेशरोधाय दत्तमुद्रमिव श्रिया ॥७

27 पान्तु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः ।
त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिबाहवः ॥८

अथ कविः ।

28 कवेः श्रीवामदेवस्य कामदेवस्य धन्विनः ।
वाणी च पंचबाणी च न लग्ना कस्य मानसे ॥१

29 कवीन्द्राश्च करीन्द्राश्च मदमन्थरगामिनः ।
वने वा स्थातुमिच्छन्ति भवने वाऽवनीभृतः ॥२

30 कवेः श्रीकालीदासस्य तस्य किं स्तुमहे वयम् ।
यस्य काव्यत्रयीं श्रुत्वा मर्त्योऽपि विबुधो भवेत् ॥३

---

20 प. °न्नोकारझङ्कारी । ख. °न्नोङ्कारझङ्कारो ॥
21 प.प्रतौ 'नं वामनीकृ' इति श्लोकभागः नष्टः ।
22 ख.प्रतौ २७तमश्लोकानन्तरं अयं श्लोकः वर्तते ।
24 पप्रतौ 'रैर्घनच्छायासदाफलाः इति श्लोकभागः नष्टः ।
28. 'शारङ्गस्य ज्या प्रत्यञ्चा तस्य घातेन' इति प.प्रतौ टिप्पणी ।
29 'पदन्यासगमनं' इति प.प्रतौं टिप्पणी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

31 स्तोतुमेककविं न श्रीवाल्मीकिमृषयो विदुः ।
द्वितीयो यस्य नास्त्येव स कथं प्रथमः कविः ।।४

32 स एव पदविन्यासस्ता एवाक्षरपङ्क्तयः ।
वक्त्रे वक्त्रे मनुष्याणां क्वापि क्वापि विदग्धता ।।५

33 सुभाषितरसास्वादबद्धरोमाञ्चकञ्चुकाः ।
विनापि कामिनीसङ्गं कवयः सुखमासते ।।६

34 लङ्घिताः कवयः स्थाने पदन्यासैर्मुरारिणा ।
पुराप्येष त्रिपद्यापि त्रिलोकोमप्यऽलङ्घयत् ।।७

35 जीयाद्गद्यसुधाधुन्याः सुबन्धुप्रभवाचलः ।
यद्भङ्ग्श्लेषमासाद्य भङ्गः कविभिराश्रितः ।।८

36 आहतप्रतिभाः केचित् केचिदाहतनिष्प्रभाः ।
घटदीपनिभाः केचित् केचित् ग्रन्थानुसारिणः ।।९

37 कवयः कालिदासाद्याः कवयो वयमप्यमी ।
मेरौ च परमाणौ च पदार्थत्वव्यवस्थितिः ।। १०

38 कवीनामगलद्दर्पो नूनं वासवदत्तया ।
शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम् ।।११ [हर्षचरित, १.११]

39 निश्वासोऽपि न निर्याति बाणे हृदयवर्तिनि ।
किं पुनर्विकटाटोपपदबन्धा सरस्वती ।। १२

40 सन्ति श्वान इवाङ्सख्या जातिभाजो गृहे गृहे ।
उत्पादका न बहवः कवयः सरभा इव ।।१३ [हर्षचरित, १.५]

41 उच्छ्वासान्तेऽप्यऽखिन्नास्ते येषां वक्त्रे सरस्वती ।
कथमाख्यायिकाकारा न ते वन्द्याः कवीश्वराः ।।१४ [हर्षचरित, १.१०]

**अथ काव्यम् ।**

42 लक्ष्मीः सुवर्णरूपापि पाणिपादेऽवलम्बते ।
भूषयत्यन्तरात्मानं वर्णरूपापि भारती ।।१

---

32. ख. 'विदग्धताः' ।
35. प. 'सुबन्धुः प्रभवाचलः' ।
33. 'शक्त्या कर्णस्य लग्ना यथा' इति प.प्रतौ टिप्पणी ।
40. 'चुल्ली' इति प.प्रतौ टिप्पणी ।
41 'हर्षाख्यायिकादि' इति प.प्रतौ टिप्पणी ।
42 ख.प्रतौ विलम्बते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

43 अपूर्वः सूक्तिसद्वल्लद्या: कोऽपि काव्यफले रसः ।
चर्वणे सर्वसामान्ये स्वादुविद्विरलो जनः ॥२

44 अपूर्वः सूक्तिकोशोऽयं दृश्यते तव भारति ।
अव्यये व्ययमायाति व्यये याति च विस्तरम् ॥३

45 धरित्र्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा नियोजिता ॥४

46 ते धन्यास्ते महात्मानः तेषां लोके स्थिरं यशः ।
यैर्निबद्धानि काव्यानि ये च काव्येषु कीर्तिताः ॥५

47 बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ॥६ [भर्तृहरि, सु.सं, ४]

48 किं कवेस्तस्य काव्येन किं काण्डेन धनुष्मतः ।
परस्य हृदये लग्नं न घूर्णयति यच्छिरः ॥ ७ [नलचम्पू, १,५]

49 काव्यं तदपि किं वाच्यमऽवाञ्चि न करोति यत् ।
श्रुतमात्रममित्राणां वक्त्राणि च शिरांसि च ॥८

अथ सुजनः ।

50 अहो किमपि चित्राणि चरित्राणि महात्मनाम् ।
लक्ष्मीं तृणाय मन्यन्ते तद्भरेण नमन्ति च ॥१

51 पतति व्यसने दैवाद्दारुणे दारुणात्मनि ।
संवर्मयति वज्रेण धैर्यं हि महतां मनः । २ [अनर्घराघव, ५.१५]

52 मरणावधयः स्नेहाः कोपास्तत्क्षणभङ्गुराः ।
परित्यागाश्च निःसङ्गाः संभवन्ति महात्मनाम् ॥३

---

43 ख॰ स्वादुज्ञो ।

45 ख० यैर्नबद्धानि ।

47 'धनमदेनाऽ हंजु(यु?)' इति प.प्रतौ टिप्पणी । 'दारिद्र्याक्रान्ता' इति अपि टिप्पणी प.प्रतौ ।

ख० प्रभवस्मयदूषिताः ।

48 ख॰ तच्छिरः ।

49 प. 'वाच्यमवाचि' ॥

50 ख. धैर्यं । 'संनाहेन' इति प.प्रतौ टिप्पणी ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

53 पुंसामुन्नतचित्तानां सुखावहमिदं द्वयम् ।
सर्वसङ्गनिवृत्तिर्वा विभूतिर्वातिविस्तरा ॥४

54 कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥ ५ [भर्तृहरि, सु. सं॰ ३४]

55 नाल्पीयसि निबध्नन्ति पदमुद्दामचेतसः ।
येषां भुवनलाभेऽपि निःसीमानो मनोरथाः ॥६

56 लज्जावतः कुलीनस्य धनं याचितुमिच्छतः ।
कण्ठे पारावतस्येव वाक्करोति गतागतम् ॥७

57 आदौ तन्व्यो बृहन्मध्या विस्तारिण्यः पदे पदे ।
यायिन्यो न निवर्तिन्यः सतां मैत्र्यः सरित्समाः ॥८

58 मन्दास्त्वां नोद्धरन्तीति मा महात्मन् विषीद तत् ।
गजानां पङ्कमग्नानां गजा एव धुरंधराः ॥९

59 शरावमनुकुर्वन्ति प्रीतयः सर्वदेहिनाम् ।
अधोमुखमसाधूनां विपरीतं विपश्चिताम् ॥१०

अथ खलः ।

60 यस्यामृतकलाप्यास्ये दुर्मुखस्य न विद्यते ।
कथं प्रलापी पापीयान् स खलः खलु जीवति ॥१

61 का खलेन सह स्पर्द्धा सज्जनस्याभिमानिनः ।
भाषणं भीषणं साधोर्दूषणं यस्य भूषणम् ॥२

62 निर्माय खलजिह्वाग्रं सर्वप्राणहरं नृणाम् ।
चकार किं वृथा शस्त्रविषवह्नीन् प्रजापतिः ॥३

63 मुखेनैकेन विध्यन्ति पादमेकस्य कण्टकाः ।
दूरात्मुखसहस्रेण सर्वप्राणहराः खलाः ॥४

64 खलानां कण्टकानां च द्विविधैव प्रतिक्रिया ।
उपानन्मुखभङ्गो वा दूरतो वा विवर्जनम् ॥५

65 जीवन्नपि न तत्कर्तुं शक्नोति सज्जनस्तथा ।
दुर्जनो यन्मृतः कुर्यात् मनुष्येभ्योऽहितं यथा ॥६

66 दुर्जनैरुच्यमानानि वचांसि मधुराण्यपि ।
अकालकुसुमानीव संत्रासं जनयन्ति नः ॥७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

67 लुब्धस्तब्धोऽगुणमूर्खः प्रभुरेकान्तदारुणः ।
बहूनेष खलः साधून्मारयित्वा मरिष्यति ॥८

68 वक्रतां बिभ्रतो यस्य गुह्यमेव प्रकाशते ।
कथं स न समानः स्यात्पुच्छेन पिशुनः शुनः ॥९

69 चारुता परदारेभ्यो धनं लोकोपतप्तये ।
प्रभुत्वं साधुनाशाय खले खलतरा गुणाः ॥१०

70 चमत्कुर्वन्ति नश्चित्तमपूर्वाः केऽप्यमी खलाः ।
येषां न तिलसम्बन्धः कदाचिदपि दृश्यते ॥११

71 अहो खलभुजङ्गस्य कोऽप्यपूर्वो वधक्रमः ।
कर्णे लगति चान्यस्य प्राणैश्चान्यो वियुज्यते ॥१२

72 स्नेहेन भूतिदानेन कृतस्वच्छोऽपि दुर्जनः ।
दर्पणश्चान्तिके तिष्ठन् करोत्येकमपि द्विधा ॥१३

73 निधानमिव मात्सर्यमन्तर्नीचस्य तिष्ठति ।
परश्लाघासु येनास्य दृश्यते मुद्रितं मुखम् ॥१४

74 वराकः स कथं नाम नम्रतामेति दुर्जनः ।
आपादमस्तकं यस्य स्थिता चान्तः कुशीलता ॥१५

75 स्वभावकठिनस्यास्य कृत्रिमां बिभ्रतो नतिम् ।
गुणोऽपि परहिंसायै चापस्य खलस्य च ॥१६

76 प्रकाशयन्ति प्रथमं जनयत्यन्धतामनु ।
भवन्त्यसाधुवाक्यार्थास्तडिद्विलसितोपमाः ॥१७

77 खलानामुपदेशोऽपि प्रकोपाय शमाय न ।
पयःपानं भुजङ्गानां केवलं विषवर्धनम् ॥१८

78 खलः सत्क्रियमाणोऽपि ददाति कलहं सताम् ।
दुग्धधौतोऽपि किं याति वायसः कलहंसताम् ॥१९

79 नौश्च दुर्जनजिह्वा च प्रतिकूल[वि]सर्पिणी ।
जनप्रतारणायैव दारुणा केन निर्मिता ॥२०

---

75. प॰ 'स्वभावकठिनास्यस्य' ।

76. ख॰ 'भवन्ति साधुवाक्यार्था' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

80 वयसः परिणामेऽपि यः खलः खल एव सः ।
सुपक्वमपि माधुर्यं नोपयातीन्द्रवारुणम् ॥२१

81 विसंवादेन मनसः कर्तव्ये भाषमाणया ।
वञ्च्यते स कथं नान्यैर्वञ्चितो यः स्वजिह्वया ॥२२

82 अहो कुटिलबुद्धीनां दुर्ग्राह्यमसतां मनः ।
अन्यद्वचसि कण्ठेऽन्यदन्यदोष्ठपुटे स्थितम् ॥२३

83 येषां प्राणिवधः क्रीडा नर्ममर्महरं वचः ।
कार्यं परोपतापित्वं ते मृत्योरपि मृत्यवः ॥२४

84 परोपघातविज्ञानलाभमात्रोपजीविनाम् ।
दासानामिव धूर्तानां जालाय गुणसङ्ग्रहः ॥२५

**अथ समस्या ।**

85 भीष्मग्रीष्मर्तुसंतापशून्यरथ्यान्तरस्थयोः
अन्योन्यालापसुखिनोर्यूनोश्चन्द्रायते रविः ॥१

86 क्वचित् मृगशिरः सान्द्रं क्वचिदालम्बिकृत्तिकम् ।
क्वचित् श्रवणसङ्कीर्णं नभो व्याधगृहायते ॥२

87 कामधूमध्वजः कोऽपि नवस्तव हृदि प्रिये ।
रोमरेखामिषाद्यस्य धूमवर्तिरधोमुखी ॥३

88 सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
दलितश्चकितश्छन्नस्त्वद्भके देव सर्पति ॥४

विद्यापतेः ॥

89 असमानसमानत्वं भविता कलहे मम ।
इति मत्वा ध्रुवं मानी मृगात्सिंहः पलायते ॥५

90 प्रावृषि प्रियमुक्तायाः प्रियायाः प्राणहारिणि
प्रियागमनदूतेन विद्युत्काकेन लक्षिता ॥६

91 दिक्षु भूमौ गिरौ व्योम्नि सर्वत्रापि विभाव्यते ।
रमयते प्राणसंदोहे तन्वी नारायणायते ॥७

---

81 प० सजिह्वया ॥
86 ० प. प्रतौ 'बहलं' इति टिप्पणी ।
88 प. 'त्वद्बलादेव' । 'आदित्य' इति प. प्रतौ टिप्पणी ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

92 विद्यायां दुर्मदो येषां कार्पण्यं विभवे सति ।
तेषां दैवाभिशप्तानां सलिलादग्निरुत्थितः ॥ ८

93 स्वस्ति क्षत्रियदेवाय जगद्देवाय भूभुजे ।
यद्यशः पुण्डरीकान्तर्गगनं भ्रमरायते ॥९

94 महिम्नामन्तरं पश्य शेषाहेः साब्धिभूधरा ।
फणाकुमुदमालायां भ्रमरीव विभाति भूः ॥१०

95 तमस्ततिगुहालीनं चन्द्रः कामिजनं हठात् ।
समर्पयति कामस्य दर्शनप्रतिभूरिव ॥११

96 दामोदरकराघातविह्वलीकृतचेतसा ।
दृष्टं चाणुरमल्लेन शतचन्द्रं नभस्तलम् ॥१२

97 नभः कर्पूरगौराभं चन्द्रो विद्रुमपाटलः ।
कज्जलं क्षीरसंकाशं करिष्यति शनैः शनैः ॥१३

98 सीतासमागमोत्कण्ठाकर्णान्ताकृष्टधन्विनः ।
राघवस्य शराङ्गारैः समुद्रादधूलिरुत्थिता ॥१४

99 दूरस्था दयिता यस्य नवा पीनपयोधरा ।
तस्य संतापशमने न वापी न पयोधरा ॥१५

100 एहि गच्छ पतोत्तिष्ठ वद मौन समाचर ।
इति वित्रस्तसारङ्गनेत्रया को न कारितः ॥१६

101 यदि नामास्य कायस्य यदन्तस्तद्बहिर्भवेत् ।
अयत्नेनैव तन्वङ्गी बहिर्दर्श्येत सा तदा ॥१७

102 ववाविवीवुवूवेवैवोवौवंव इति स्वराः ।
प्रावर्तन्त रिपुस्त्रीणां पूर्गृहे सैनिकैः कृते ॥१८

---

93 'मध्ये' इति प. प्रतौ टिप्पणी ।
94 'अन्धकारसन्तति' इति प. प्रतौ टिप्पणी ।
95 ख. 'चन्द्र कामिजनं' ।
97 'उदितः' इति प. प्रतौ टिप्पणी । ख. 'नभः कर्पूरपूगाभं' ।
99 प० 'वित्रस्तसारङ्गनेत्रयाः' ।
101 प० 'यदन्तर्द्बहिभवेत् ।

२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ नृपः ।

103 भवतस्तुल्यतामेति न सोमो न दिवाकरः ।
यस्य दातुः परिश्रान्तो न रात्रौ न दिवा करः ॥१

104 क्षणमप्यनुगृह्णाति यं दृष्टिस्तेऽनुरागिणी ।
ईर्ष्ययेव त्यजत्याशु तं नरेन्द्र दरिद्रता ॥२

105 दरिद्रान् सृजतो धातुः कृतार्थान् कुर्वतस्तव ।
श्रीकीर्तीश न जानीमः कः श्रमेण विरंस्यति ॥३

106 राजन् तवासिपत्रस्य राजते पुष्करावली ।
कालाहूतद्विषल्लेखलिखितेवाक्षरावली ॥४

107 अमी पानकरङ्काभाः सप्तापि जलराशयः ।
त्वद्यशोराजहंसस्य पञ्जरं भुवनत्रयम् ॥५

108 सर्वदा सर्वदोसीति मिथ्या संस्तूयसे बुधैः ।
नारयो लेभिरे पृष्ठं न वक्षः परयोषितः ॥६

109 अगम्यगमनात्प्रायः प्रायश्चित्तीयते जनः ।
अगम्यं त्वद्यशो याति सर्वत्रापि प्रपूज्यते ॥७

110 इयता स धुसत्गोप विचिकित्सां चिकित्सति ।
च्युतिर्न यदहल्यायै जारत्वेनं जुगुप्सते ॥ ८

111 उष्मायमाणया तन्व्या दृशा बाष्पायमाणया ।
नद्यः शुष्यन्ति पुष्यन्ति विन्ध्ये यस्यारियोषिताम् ॥९

112 दिशः पटपटायन्ते गगनं लोहितायते ।
कर्णतालास्तसिंदूरे हास्तिके यस्य सर्पति ॥१०

त्रयश्छित्तपस्य

---

104 प. इर्ष्येयेव । 'बोछलिता' इति प. प्रतौ ।
105 'निवर्तयिष्यति' इति प. प्रतौ टिप्पणी ।
107 'पानीयस्थानानि' इति प. प्रतौ टिप्पणी ।
110 प. 'निचिरसां चिकित्सति' । ख. 'यदहल्यादो' । भूमी इति प. प्रतौ टिप्पणी । अस्यार्थोऽस्पष्टः ।
112 प. 'लोहितायति' । 'अभ्युक्षिप्त' इति प. प्रतौ टिप्पणी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

113 भयमेकमनेकेभ्यः शत्रुभ्यो युगपत्सदा ।
ददासि यच्च ते नास्ति राजन् चित्रमिदं महत् ॥११

114 सौकरं रूपमास्थाय हरिणाप्युद्धृता मही ।
असौकरं त्वया कृत्वा राजन् चित्रमिदं महत् ॥१२

115 चित्रं कारणमन्यत्र कार्यमन्यत्र दृश्यते ।
महान् प्रतापो देवस्य दाहस्तु हृदि विद्विषाम् ॥१३

116 दोषाणां च गुणानां च त्वयि संख्या न विद्यते ।
गुणानामप्रमेयत्वाद्दोषाणामप्यसंभव त ॥१४

117 भूभृद्वंशप्रभूतानां धनुषां च द्विषां चयः ।
जीवापकर्षणं चक्रे समं समरसीमनि ॥१५

118 आशंकितसुनासीरे नासीरे यस्य सर्पति ।
स्पर्द्धयेव प्रसर्पन्ति प्राणाः प्रत्यर्थिभूभुजाम् ॥१६

सोमेश्वरस्यैते ।

119 मन्ये वात्सल्यमेवासीत् त्वच्चापं हृदि विद्विषाम् ।
रणभूमौ नमत्यस्मिन्नेमुस्ते कथमन्यथा ॥१७

वाहडस्य ।

120 प्रायेण सर्वं पश्यन्ति विपरीतं विनश्वराः ।
यतः काञ्चनगौरोऽपि काल एवासि विद्विषाम् ॥१८

121 तुलामारुह्य रविणा वृश्चिके निहितं पदम् ।
भवता शिरसि न्यस्तमयत्नेनैव भोगिनाम् ॥१९

122 विचरेदेकपाद्धर्मः कथमस्मिन् कलौ युगे ।
यदि वंशस्त्वदीयोऽयं न स्यादस्यावलम्बनम् ॥२०

123 असिदूरेण सीमन्ता मा भूत्त योषितामिति ।
त्यक्त्वा प्रयान्तु सीमान्तादसि दूरेण तेऽरयः ॥२१

---

113 ख. तच्चते ॥
116 प० दोषानां च गुणानां च ॥
119 'प्रणता' इति ख. प्रतौ टिप्पणी ।
122 'कृतयुगेन' इति प. प्रतौ टिप्पणी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

124 किं कृतेन न यत्र त्वं यत्र त्वं किमसौ कलिः ।
कलौ चेद्भवतो जन्म कलिरस्तु कृतेन किम् ॥२२

125 पद्मानां नालदण्डेषु देहदण्डेषु कामिनाम् ।
दृश्येते यदि नान्यत्र त्वयि रक्षति कण्टकाः ॥२३

126 कीर्तिस्ते जातजाड्येव पुराम्भोधिमज्जनात् ।
आतपाय जगन्नाथ गता मार्तण्डमण्डलम् ॥२४

127 अपूर्वेयं धनुर्विद्या भवता शिक्षिता कुतः ।
मार्गणौघः समभ्येति गुणो याति दिगन्तरम् ॥२५

128 दोःस्तम्भे शुशुभे यस्य धनुर्गुणकिणावली ।
कालायसमयी मन्ये शृङ्खला जयदन्तिनः ॥२६

129 कटकः कण्टकान् यस्य दलयामास निर्दयम् ।
स हि न क्षमते किञ्चित् बिन्दुनाप्यात्मनोऽधिकम् ॥२७

130 अधिज्यं यस्य कोदण्डं स्मरन्तः परिपन्थिनः ।
व्यथन्ते स्म पुरन्ध्रीणां विलोक्य भ्रूलतामपि ॥२८

131 राजेति नामतः काममनुना स्पर्द्धतां विधुः ।
कलास्तु षोडश स्वस्य कथं कुर्याच्चतुर्गुणाः ॥२९

132 पृथूदके भवत्स्नाने स परः शतपुष्करे ।
दृष्टेऽपि पाप्मनां पुंसां पापराशिः प्रणश्यति ॥३०

133 अनास्वादितसंभोगाः पतन्तु तव शत्रवः ।
बालवैधव्यदग्धानां कुलस्त्रीणां कुचा इव ॥३१

134 नारायणायितं देव त्वया नरकविद्विषा ।
यदेकः शिशुपालोऽपि स्थापितो न द्विषां कुले ॥३२

---

123 ख० 'सीमन्तादर्सि'
124. प० 'यन्म कलिरस्तु' ॥
127. ख० 'मार्गणोघ समभ्येति' ।
130. 'शत्रवः' इति प. प्रतौ टिप्पणी ।
131. 'अनुमतं' 'चन्द्र' 'आत्मनः' इति प. प्रतौ टिप्पण्यः ।
132 'भव' 'शतात्परः' 'तीर्थे' इति प. प्रतौ टिप्पण्यः । ख० 'भवत्सङ्गे परः शतपुष्करे' ।
134 ख० 'नारायणायतं' । 'दानवः,' 'बालहारकः' च इति प. प्रतौ टिप्पण्यः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

135 कृतं कलौ त्वयैकेन परलोकप्रसाधनम् ।
गुणानुबन्धिभिः शुद्धैर्मार्गणैः सफलीकृतैः ॥३३
136 राजन् त्वमेव पातालमाशानां त्वं निबन्धनम् ।
त्वं चामरमरुद्भूमिरेको लोकत्रयायसे ॥३४
137 करपातैर्दुरालोकैस्तीक्ष्णैः संतापयन् प्रजाः ।
भानुर्न भवता तुल्यः क्षणसंरक्तमण्डलः ॥३५
138 सरस्वती स्थिता वक्त्रे लक्ष्मी वेश्मनि ते स्थिता ।
कीर्तिः किं कुपिता राजन् येन देशान्तरं गता ॥३६
139 त्वया सह विरुद्धानां कुतः कुशलता कुले ।
वासोऽपि नियतस्तेषां वने कुशलताकुले ॥३७
140 विरोधात्तव शत्रुणां जातं सौगतदर्शनम् ।
विग्रहे क्षणभङ्गित्वं सर्वार्थेषु च शून्यता ॥३८
141 कुर्वन्गङ्गाम्भसां क्षोभं यस्य निस्वाननिस्वनः ।
स्नातीव वारिवधूवर्गगर्भपातनपातको ॥३९

अथ शान्तः ।

142 स्वप्ने चिदंशवैकल्यं जागरे विषयग्रहः ।
स्वप्नजागरणातीतं पदमाहुर्मनीषिणः ॥१
143 ब्रह्माण्डसम्पुटं भित्वा यो न याति परात्परम् ।
स पुमानिति निर्देशं गर्भस्थो लभते कथम् ॥२
144 जरामरणदौर्गत्यव्याधयस्तावदासताम् ।
मन्ये जन्मैव धीरस्य भूयो भूयस्त्रपाकरम् ॥३
145 आवासः क्रियतां गाङ्गे पापवारिणि वारिणि ।
तन्वङ्ग्याः कुचयुग्मे वा मनोहारिणि हारिणि ॥४

[भर्तृहरि, सु.सं,१३५]

146 निदाघे पुटपाकेन जलौघेन घनागमे ।
शीतज्वरेण हेमन्ते सावधः सर्वदा जनः ॥५

---

135 'शत्रुनिर्गतैः' इति प. प्रतौ टिप्पणी ।
136 'रक्षक,' 'लोकाशा,' 'त्वं चामरयोग्यताश्च' इति प. प्रतौ टिप्पण्यः ।
138 प० कोपिता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

147 शिरसा बिभृता नित्यं स्नेहेन परिपालिताः ।
केशा अपि विरज्यन्ते के ते न यान्ति विक्रियाम् ॥६

148 स्पृष्ट्वा मृतमाप्लुत्य सवासाः शुद्धिमाप्नुयात् ।
तेनैवोपचिनोति स्वं योऽस्य शुद्धिः कथं पुनः ॥७

149 किमनेन न पर्याप्तं मांसस्य परिवर्जनम् ।
यत्या चित्तं (?) तृणेनापि स्वमङ्गं परिदूयते ॥८

150 कृमयो भस्म विष्ठा वा निष्ठा यस्येयमीदृशी ।
स कायः परपीडाभिर्धार्यतामिति को नयः ॥९

151 नित्यमाचरतः शौचं कुर्वतः पितृतर्पणम् ।
यस्य नोद्विजते चेतः शास्त्रं तस्य करोति किम् ॥१०

152 यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्याश्रुतस्य च ॥११

[भगवद्गीता, २,५२]

153 राजानमपि सेवन्ते विषयानपि भुञ्जते ।
रमन्तेऽपि सह स्त्रीभिरहो साहसिकाः नराः ॥१२

154 अर्थप्रियतयात्मानमप्रियाय ददाति या ।
तामात्मन्यपि निःस्नेहां को नु रक्तेति मन्यते ॥१३

155 चतुरः सृजता पूर्वमुपायांस्तेन वेधसा ।
न सृष्टः पञ्चमः कोऽपि गृह्यन्ते येन योषितः ॥१४

156 न मानेन न दानेन नार्जवेन न सेवया ।
न शस्त्रेण न शास्त्रेण सर्वथा किमपि स्त्रियः ॥१५

157 अहो लुब्धक लुब्धस्त्वं कं पृच्छसि मुहुर्मुहुः ।
या पश्यति न सा ब्रूते या ब्रूते सा न पश्यति ॥१६

158 सन्निधौ निधयस्तस्य कामगव्यनुगामिनी ।
अमराः किंकरायन्ते संतोषो यस्य भूषणम् ॥१७

159 तृणं ब्रह्मविदः स्वर्गं तृणं शूरस्य जीवितम् ।
विरक्तस्य तृणं नारी निरीहस्य तृणं नृपः ॥१८

148. 'स्नानान्नं (स्नानेन)' इति प. प्रतौ टिप्पणी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

160 सत्यमेव प्रयागोऽयं मोक्षद्वारमुदीर्यते ।
देव्या यत्रामितो गङ्गायमुने वहतः श्रियम् ॥१९

161 प्रयागः सर्वतीर्थेषु तीर्थमुच्चैस्तरामयम् ।
संसारस्य परं पारमिहस्थैरवलोक्यते ॥२०

162 श्यामो नाम वटः सोऽयमेतस्याद्भुतकर्मणः ।
छायामप्यधिवास्तव्यैः परं ज्योतिर्निषेव्यते ॥२१

163 दूर्वाकुशाङ्कुराहाराः श्लाघ्यास्तात वने मृगाः ।
विभवोन्मत्तचित्तानां न पश्यन्ति मुखानि ये ॥२२

164 दृषद्भिः सागरो बद्धो मनुष्यैरिन्द्रजिज्जितः ।
वानरैर्वेष्टिता लङ्का जीवद्भिः किं न दृश्यते ॥२३

165 षष्ठं किमिति न प्रोक्तं महापातकमुत्तमम् ।
यदेतदीश्वरद्वारि दुराशाटिरिटिल्लितम् ॥२४

166 सत्यं मनोरमाः कामाः सत्यं रम्या विभूतयः ।
किन्तु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितम् ॥२५

167 उच्छ्वासावधयः प्राणाः स उच्छ्वासः समीरणः ।
समीरणाच्चलं नास्ति यज्जीवति तदद्भुतम् ॥२६

168 सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम् ॥२७

169 आसन्नतरतामेति मृत्युर्जन्तोर्दिने दिने ।
आघातं नीयमानस्य वध्यस्येव पदे पदे ॥२८

170 सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ।
शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥२९ [नागानन्द, ४,७]

171 क्रोडं करोति प्रथमं यदा जातमनित्यता ।
धात्रीव जननी पश्चात्तदा शोकस्य कः क्रमः ॥३० [नागानन्द, ४,८]

---

163– 164 खप्रतौ नोपलभ्येते ।

165. प. किमिते न प्रोक्तं ।

167. प. संयोगा ता विप्रयोगान्ता ।

169. 'वध्यस्थानं' इति प प्रतौ टिप्पणी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

172 पृथ्वीं पयोधिपर्यन्तां यः शास्त्यैकपुरीमिव ।
एवमेवोदरं तस्याथैश्वर्ये किं प्रशंससि ॥३१

173 आभोगिनौ मण्डलिनौ तत्क्षणोन्मुक्तकञ्चुकौ ।
वरमाशीविषौ स्पृष्टौ न तु तन्व्याः पयोधरौ ॥३२

174 पितृमातृमयो बाल्ये यौवने वनितामयः ।
वार्द्धके संततिमयो मुग्धो नात्ममयः क्वचित् ॥३३

175 अनादाविह संसारे दुर्वारे मकरध्वजे ।
कुले च कामिनीमूले विभवे का विकल्पना ॥३४

176 कथं ते पातकपरा नरा रात्रिषु शेरते ।
मरणान्तरिता येषां नरकेषु विपत्तयः ॥३५

177 आपदां कथितः पन्था इन्द्रियाणामसंयमः ।
तज्जयः सम्पदां मार्गो येनेष्टं तेन गम्यताम् ॥३६

178 अस्थिस्थूणं स्नसास्यूतं मांसशोणितलेपनम् ।
कीर्णं मूत्रपुरीषाभ्यां भूतावासमिमं त्यज ॥३७

179 पूर्ववयसि यः शान्तः स शान्त इति मे मतिः ।
धातुषु क्षीयमाणेषु शमः कस्य न जायते ॥३८

180 यदि यत्रैव तत्रैव यथैव च तथैव च ।
रतिं त्वं चित्त बध्नासि नासि दुःखस्य भाजनम् ॥३९

**अथ स्त्रीप्रशंसा ।**

181 यदेव रोचते मह्यं तदेव कुरुते प्रिया ।
इति वेत्ति न जानाति तत्प्रियं यत्करोति सा ॥१

182 दयिताबाहुपाशस्य कुतोऽयमपरो विधिः ।
जीवयत्यर्पितः कण्ठे मारयत्यपवर्जितः ॥२

183 हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले ।
मुक्तानामप्यवस्थेयं के वयं स्मरकिंकराः ॥३

---

172. 'रक्षयति' इति प प्रतौ टिप्पणी ॥
175. ख. 'विप्लवे का विकल्पना' । 176. प. 'मरणान्तरितो येषां' ॥ 178. ख. 'नासास्यूतं' । 182. प. 'जीवत्यर्पितः' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

184 एकमेव बलिं बद्ध्वा जगाम हरिरुन्नतिम् ।
तन्व्यास्त्रिवलिबन्धेऽपि सैव मध्यस्य नम्रता ॥४

185 एक एव बलिर्बद्धो वामनीभूय विष्णुना ।
लीलयैव त्वया तन्वि मन्ये बद्धं वलित्रयम् ॥५

186 दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः ॥६
[विद्धशालभञ्जिका १,३]

187 नासीत् नास्ति न वा नारी भविष्यत्यनया समा ।
इति रेखात्रयं वेधाश्चक्रेऽस्यास्त्रिवलिच्छलात् ॥७

188 अमृतस्येव कुण्डानि सुखानामिव राशयः ।
रतेरिव निधानानि योषितः केन निर्मिताः ॥८
[भर्तृहरि. सु. सं, ७०३]

189 मनः प्रह्लादयन्तीभिर्मदं यान्तीभिरप्यलम् ।
महान्तोऽपि प्रपद्यन्ते स्त्रीभिरद्भिरिवाचलाः ॥९

190 अस्या मनोहराकारकबरीभारनिर्मि(?र्जि)ताः ।
लज्जयेव वने वासं चक्रुश्चमरबर्हिणः ॥१०

191 बाले ललामलेखेयं भाले भल्लीव राजते ।
भ्रूलताचापमाकृष्य न जाने कं हनिष्यसि ॥११

192 यतो यतः क्षिपत्यक्षि क्षिप्रमायतलोचना ।
ततस्ततः प्रक्षिपति पञ्च पञ्चशरः शरान् ॥१२

193 नपुंसकमिति ज्ञात्वा त्वां प्रति प्रहितं मनः ।
तत्त तत्रैव रमते धृ(?हृ)ताः पाणिनिना वयम् ॥१३

194 सह प्रयातं लोलाक्ष्या मनो यन्न निवर्तते ।
तत्प्रवृत्तिमिवान्वेष्टुं दृष्टिस्तत्रैव धावति ॥१४

195 इदं रम्यमिदं रम्यमित्यावसथवृत्तया(ये?) ।
तस्या भ्रमति सर्वाङ्गं मन्ये मूढ इव स्मरः ॥१५

---

186. ख. चारुलोचनाः । 187. ख. प्रतौ श्लोकोऽयं 'हारोऽयं (१८३)' इति श्लोकानन्तरं दृश्यते । 188 'रतेरिव' (188) इत्यत आरभ्य 22३ तम श्लोकान्तर्गत 'पुरः सखीजन' इति पर्यन्तः सन्दर्भः पत्रचतुष्क(२०तः २३)त्रुटेर्नोपलभ्यते प प्रतौ ॥
193 ख प्रतौ 'प्रति'शब्दः नष्टः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

196 जङ्के तदीये संतापं यज्जनस्यानुरागिणः ।
जनयांचक्रतुस्तीव्रं तत्र हेतुर्विलोमता ॥१६

197 तत्त्रिविष्टपमाख्यातं तन्वङ्ग्या यद्वलित्रयम् ।
यत्रानिमेषदृष्टित्वं नृणामप्युपजायते ॥१७

198 यन्न माति तदङ्गेषु लावण्यमिति संभृतम् ।
पिण्डीकृतमुरोदेशे तत्पयोधरतां गतम् ॥१८

199 हाराय गुणिने स्थानं न दत्तमिति लज्जया ।
तन्वङ्ग्याः कुचयुग्मेन मुखेन प्रकटीकृतम् ॥१९

200 उन्नतः प्रोल्लसद्धारः कालागुरुमलीमसः ।
पयोधरभरस्तन्व्याः कं न चक्रेऽभिलाषिणम् ॥२०

201 भूर्भुवःस्वर्विभूतीनां सौभाग्यं यत्प्रसादतः ।
ताभ्यः सकर्णः को नाम कामिनीभ्यः पराङ्मुखः ॥२१

202 विधायापूर्वपूर्णेन्दुमस्या मुखमभूद्ध्रुवम् ।
धाता निजासनाम्भोजविनिमीलनदुःस्थितः ॥२२
[ रत्नावली, २,८ ]

203 स्त्रीति नामातिमधुरं कुर्यात्किं न स्मरातुरम् ।
किमुतौदार्यचातुर्यप्रसादमधुरं वचः ॥२३

204 अकृत्रिमप्रेमरसा विलासालसगामिनी ।
असारे दग्धसंसारे सारं सारङ्गलोचना ॥२४

205 अभ्यासः कर्मणां नित्यमुत्पादयति कौशलम् ।
विधिना तावदभ्यस्तं सृष्टा यावन्मृगेक्षणा ॥२५

206 अस्याः कान्तस्य रूपस्य सर्वौपम्यातिशायिनः ।
गच्छेदेकैव सादृश्यं स्वच्छाया दर्पणाश्रिता ॥२६

207 मारयन्त्या जनं तस्या निरागसमवज्ञया ।
मातङ्गानां गतिर्यादृक् तादृगासीदसंशयम् ॥२७

208 धाता यदि न चक्षुष्मान्केनेयं निर्मितेदृशी ।
अथ चेद् दृष्टवान्स्यस्य को हेतुरपरिग्रहे ॥२८

209 तस्या विनापि हारेण निसर्गादेव हारिणौ ।
जनयामासतुः कस्य विस्मयं न पयोधरौ ॥२९

210 किं चित्रमुन्नतश्रीकौ यत्प्रियायाः पयोधरौ ।
तस्या हृदयलाभेन जायते कस्य नोन्नतिः ॥३०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

211 किं चित्रं यदि तन्वङ्ग्याः स्तनाभ्यां निर्जितं जगत् ।
एको जयति सद्वृत्तः किं पुनर्द्वौ सुसंहतौ ॥३१

212 कण्ठस्य विदधे कान्तिर्मुक्ताभरणता यथा ।
तस्याः स्वभावस्यस्य मुक्ताभरणता य(त)था ॥३२

213 अतः परमगम्योऽयं पन्था विश्रम्यतामिति ।
प्रत्यक्षियुगलं तस्याः कर्णौ वक्तुमिव स्थितौ ॥३३

214 न युक्तं स्वच्छमध्यानां बहुश्रुतविलङ्घनम् ॥
इत्यवेत्य स्थितौ तन्व्याः कर्णावाश्रित्य लोचनौ ॥३४

215 समस्तस्यापि रत्नस्य व्रणेऽर्घः परिहीयते ।
दयिताधररत्नं तु व्रणितं यात्यनर्घताम् ॥३५

216 द्विजसङ्गतिमासाद्य सर्वो रागाद्विमुच्यते ।
रक्तस्तथापि तन्वङ्ग्या बिम्बोष्ठः केन हेतुना ॥३६

217 मन्ये नेत्रपथं तस्यां गतायां लोलचक्षुषि ।
बभूवुः पञ्चबाणस्य स्वबाणा एव वैरिणः ॥३७

**अथ विरहिणी ।**

218 यामीति प्रियपृष्टायाः प्रियायाः कण्ठवर्तिनोः ।
वचोजीवितयोर्जातः पुरोनिःसरणे रणे(णः) ॥१

219 शय्या प्रकल्पितैकत्र चितैकत्र प्रकल्पिता ।
अद्य कान्तः कृतान्तो वा दुःखस्यान्तं करिष्यति ॥२

220 गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥३

[ काव्यादर्श,२,१४१

221 हस्तमाकृष्य यातोऽसि बलादिति किमद्भुतम् ।
हृदयाद्यदि निर्यासि पौरुषं गणयामि ते ॥४

222 अदर्शने (अदृष्टे) दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता ।
नादृष्टेन न दृष्टेन भवता लभ्यते सुखम् ॥५

223 अयि लङ्घितमर्याद स्मर स्मर हरानलम् ।
दग्ध दग्धुमयुक्तं ते जनं विरहविह्वलम् ॥६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

224 आश्वासयति काकोऽपि दुःखितां पथिकाङ्गनाम् ।
त्वं चन्द्रामृतजन्मापि दहसीति किमुच्यताम् ॥७

225 रागाग्नितान्तरक्तेन लोचनानन्दकारिणम् ।
उवाह मनसा कान्तं पाणिना मुखपङ्कजम् ॥८

226 दीनायां दीनवदनो रुदत्यां साश्रुलोचनः ।
पुरः सखीजनस्तस्याः प्रतिबिम्बमिवाबभौ ॥९

227 दह्यमानेऽपि हृदये मृगाक्ष्या मन्मथाग्निना ।
स्नेहस्तथैव यत्तस्थौ तदाश्चर्यमिवाभवत् ॥१०

228 तस्याः स्तनान्तरे न्यस्तं चन्दनं तापशोषितम् ।
मनोभवाग्निदग्धस्य बभौ भस्मेव चेतसः ॥११

229 तापोपघातदक्षाणि मृणालानि नतभ्रुवः ।
नाभुवन् दीर्घसूत्रेभ्यः काङ्क्षितं प्राप्यते कुतः ॥१२

230 मा गाः पान्थ प्रियां मुक्त्वा दूराकृष्टशिलीमुखम् ।
स्थितं पन्थानमावृत्य किंकिरातं न पश्यसि ॥१३

## अथ विरही*

231 हारो नारोपितः कण्ठे[1] कष्टसंश्लेषभीरुणा ।
इदानीमन्तरे जाताः पर्वताः सरितो द्रुमाः ॥१

232 सा दृष्टा यैर्न वा दृष्टा मुषिताः सममेव ते ।
हृतं हृदयमेकेषामन्येषां चक्षुषः फलम् ॥२

233 यदि स्मरामि तां तन्वीं जीविताशा कुतो मम ।
अथ विस्मृत्य जीवामि जीवितव्यसनेन किम् ॥३

234 प्राणानां च प्रियायाः(याश्च) मूढाः सादृश्यकारिणः ।
प्रिया कण्ठगता रत्यै प्राणा मरणहेतवे ॥४

235 प्रियादर्शनमेवास्तु किमन्यैर्दर्शनान्तरैः ।
प्राप्यते येन निर्वाणं सरागेणापि चेतसा ॥५

---

230 श्लोकोऽयं नोपलभ्यते ख प्रतौ ।

*'अथ विरही' इति पद्धतिनिर्देशो नोपलभ्यते ख प्रतौ । समग्रा चेयं पद्धतिः (६४ श्लोकप्रमाणा) प प्रतौ ४६३ श्लोकानन्तरं प्रकीर्णकपद्धतेरनन्तरं उपलभ्यते ।

१ 'कण्ठ' इत्यन्तर्गत 'ठ' वर्णादारभ्य २७९ तम श्लोकचतुर्थचरणगत 'विषादप्यतिरिच्यते' ग्रन्थसंदर्भः नोपलब्धः प प्रतौ पत्रपञ्चकत्रुटेः (पत्र४२तः ४६)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

236 दिव्यचक्षुरहं जातः सरागेणापि चेतसा ।
दूरस्थो येन पश्यामि देशान्तरगतां प्रियाम् ॥६॥

237 एकतो दिवसान्कान्ता गणयत्यन्यतो यमः ।
न विद्मः प्रथमं कस्य यास्यामो वयमन्तिकम् ॥७॥

238 अग्रतो बाहुपाशेन केशपाशेन पृष्ठतः ।
पार्श्वतः केशपाशेन(?) सर्वतो बन्धनं हि सा ॥८॥

239 मध्येनैकेन तन्वङ्ग्याः क्षामेण क्षपिता वयम् ।
उन्नतं स्तनयुग्मं तु न विद्मः किं करिष्यति ॥९॥

240 मध्यदेशात्पुनः काञ्चीदेशं गच्छद्भिराकुलैः ।
तन्व्या वपुषि लोकस्य लोचनैः पथिकायितम् ॥१०॥

241 अनया जघनाभोगभरमन्थरया तया ।
अन्यतोऽपि व्रजन्त्या मे हृदये निहितं पदम् ।११।

242 मम कामशराघातैर्व्रणिते हृदये स्थिता ।
कथं सलवणा तन्वी संतापं न करिष्यति ।१२॥

243 लवणं क्षिप्यते यत्र तत्पात्रं क्षीयते किल ।
लावण्यं तव तन्वङ्गि कथं क्षीयामहे वयम् ॥१३॥

244 सा यौवनमदोन्मत्ता वयमस्वस्थचेतसः ।
तस्या लावण्यमङ्गेषु दाहोऽस्मासु विजृम्भते ॥१४॥

245 क्षिपतोऽप्यन्यतश्चित्तं सैव सारङ्गलोचना ।
शङ्केव कृतपापस्य हृदयान्नापसर्पति ॥१५॥

246 एकमुत्कण्ठया व्याप्तमन्यद्दयितया हृतम् ।
चेतनामपरं धत्ते कियन्(न्ति) हृदयानि मे ॥१६॥

247 हंस प्रयच्छ मे कान्तां गतिस्तस्यास्त्वया हृता ।
संभावितैकदेशेन देयं यदभियुज्यते ॥१७॥
[विक्रमोर्वशीयम्, ४, १७]

248 प्रियानेत्रमुखच्छायाहृतलावण्यशोभयोः ।
समानदुःखयोरैक्यं युक्तं तन्मृगचन्द्रयोः ॥१८॥

249 वाहि वात यतः कान्तां तां स्पृष्ट्वा मामपि स्पृश ।
बह्वेतत्कामयानस्य शक्यमेतेन जीवितुम् ॥१९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

250 यदहं सा च वामोरूरेकां धरणिमाश्रितौ ।
बह्वेतत्कामयानस्य नैतद्दैन्यं विजानतः ॥२०॥

251 न मे दुःखं प्रिया दूरे न मे दुःखं हृतेति सा ।
एतदेवानुशोचामि वयस्तस्यातिवर्तते ॥२१॥

252 कदा न्वहं सुदन्तोष्ठं मुखं पद्मदलेक्षणम् ।
ईषदुन्न[न्ना]म्य पास्यामि रसायनमिवोत्तमम् ॥२२॥

253 प्रियामुखमनुस्मृत्य दीर्घचारुविलोचनम्
न याति शतधा येन मनस्तेन नपुंसकम् ॥२३॥

254 प्रियाविरहितस्याद्य हृदि चिन्ता ममागता ।
इति मत्वा गता निद्रा के कृतघ्नमुपासते ॥२४॥

255 क्षणभङ्गि जगत्सर्वमिति तथ्यं मुनेर्वचः ।
कोऽन्यथा हरिणाक्षीणां सहेत विरहव्यथाम् ॥२५॥

256 स्फुटमाचक्षते शाब्दाः शब्दानामिह नित्यताम् ।
प्रिययोक्ता यदद्यापि हृदि तिष्ठन्ति मे गिरः ॥२६॥

257 पदे वाक्ये प्रमाणे च परां निष्ठामुपागता ।
अतो विद्वज्जनस्यास्य स्पृहणीया मृगेक्षणा ॥२७॥

258 मनः प्रकृत्यैव चलं दुर्लक्षं च तथापि मे ।
अनङ्गेन कथं विद्धं समं सर्वशिलीमुखैः ॥२८

[रत्नावलि, ३, २]

259 अन्तर्मलीमसे वक्रे चले कर्णान्तसर्पिणि ।
तस्या नेत्रयुगे दृष्टे दुर्जने च कुतः सुखम् ॥२९

260 रूपातिशयकर्तॄणां प्रतिच्छन्दो ह्यकारणम् ।
विलोलनयनां धात्रा सृजता किं निरीक्षितम् ॥३०

261 माधुर्यं मृगशावाक्ष्या यदि धात्रा विनिर्मितम् ।
तदत्यन्तविरुद्धेन लावण्येन किमाश्रितम् ॥३१

262 गतानि हन्त हंसीनां हरन्ती हरिणेक्षणा ।
करोति मामगतिकमहो श्रीवृत्तमद्भुतम् ॥३२

263 अपूर्वः कोऽपि तन्वङ्ग्या मम मार्गः प्रदर्शितः ।
योगं चिन्तयतो येन राग एव विवर्धते ॥३३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

264 विहाये(रो) मृगशावाक्ष्याः सुगताधिष्ठितो यदि ।
कथं वसति तत्रैव स्मरो विगतकार्मुकः ॥३४

265 सखे समं प्रयातेषु समस्तेष्विन्द्रियेषु मे ।
मनो गृहीतं तन्वङ्ग्या कस्यचित्किञ्चिदीप्सितम् ॥३५

266 यो यः पश्यति तन्नेत्रे रुचिरे वनजायते ।
तस्य तस्यान्यनेत्रेषु रुचिरेव न जायते ॥३६

267 कथं मुग्धे कथं वक्रे कान्तायास्ते विलोचने ।
कथं जनानुरागाय कथं जनविपत्तये ॥३७

268 सा श्रुता हृदि तापाय दृष्टोन्मादाय केवलम् ।
स्पृहा(ष्टा?) भवति शोभा(का)य सा नाम दयिता कथम् ॥३८

269 मां प्राप्य दैवहतकं मुनेरप्यनृतं वचः ।
यतः प्रियावियोगस्य क्षणभङ्गो न दृश्यते ॥३९

270 नूनमाज्ञाकरस्तस्याः सुभ्रुवो मकरध्वजः ।
यतस्तन्नेत्रसंचारसूचितेषु प्रवर्तते ॥४०

[भर्तृहरि, सु.सं, १२७]

271 यस्य केशेषु जीमूताः नद्यः सर्वाङ्गसन्धिषु ।
कुक्षौ समुद्राश्चत्वारः स जयेद्विरहानलम् ॥४१

272 येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं स तन्व्याः कथयेद्गुणान् ॥४२

273 गुरुणा स्तनभारेण सोपदिष्टा तथामुना ।
यथा तत्क्षणमेवास्ता(प्ता) तया नयसमा गतिः ॥४३

274 सति प्रदीपे सत्यर्के सत्सु तारामणीन्दुषु ।
विना मे मृगशावाक्ष्यास्तमोभूतमिदं जगत् ॥४४

275 मुखेन चन्द्रकान्तेन महानीलैः शिरोरुहैः ।
हस्ताभ्यां पद्मरागाभ्यां रेजे रत्नमयीव सा ॥४५

[भर्तृहरि, सु. सं, १३१]

276 गुरुणा स्तनभारेण मुखचन्द्रेण भास्वता ।
शनैश्चराभ्यां पादाभ्यां रेजे ग्रहमयीव सा ॥४६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

277 यदि सा चारुसर्वाङ्गी चित्ते मे वसति प्रिया ।
तत्कथं शून्यचित्तोऽहमहो विधिविपर्ययः ॥४७

278 अहो अहं नमो मह्यं यदहं वीक्षितोऽनया ।
बालया त्रस्तसारङ्गतरलायतनेत्रया ॥४८

279 तावदेवामृतमयी यावल्लोचनगोचरे ।
चक्षुःपथादपेता तु विषादप्यतिरिच्यते ॥४९

[भर्तृहरि, सु. सं, १२५]

280 हन्तन्यपक्षे निक्षिप्ता यदि नाम विधेर्वयम् ।
उपाया किमु नान्ये स्युर्दर्शिता यन्मृगेक्षणा ।५०

281 तन्व्या विप्रयुक्तस्य दिवसा यान्ति ये मम ।
निर्घृणस्तानपि यमः प्रायेण गणयिष्यति ।५१

282 विरहे मृगशावाक्ष्या तयैवोपकृतं मम ।
यदन्यस्त्रीपरिष्वङ्गप्रार्थनाशल्यमुद्धृतम् ॥५२

283 मूढाः संयोगमिच्छन्ति वियोगस्तु मयेष्यते ।
एकैव संगमे बाला वियोगे तन्मयं जगत् ॥५३

284 अपेहि हृदयाद्वा मे वामे दर्शनमेहि वा ।
अदूरविरहोत्कण्ठा दुखं दुःखेन सह्यते ॥५४

285 निद्रामप्यभिनन्दामि क्षणचैतन्यहारिणीम् ।
किं पुनर्मृगशावाक्ष्याः वियोगे मरणोत्सवम् ॥५५

286 अस्या मुखेन लोकानां हतपङ्कजकान्तिना ।
निशासु नाशिता निद्रा कुमुदानामिवेन्दुना ॥५६

287 यत्पराधीनयोः प्रेम दैवादुत्पद्यते क्वचित् ।
तत्र विमुच्य लज्जां वा जीवितं वा कुतः सुखम् ॥५७

## अथ योगी

288 सुभाषितेन गीतेन विलासेन च योषितः ।
ह्रियते नो मनो यस्य स योगी वाऽथवा पशुः ॥१

---

॥282॥ एकैवावियोगेन———————। कृतोपकार एवायं विरह. केन निन्द्यते ॥२८२॥"
इति प प्रतौ ॥

287. ख प्रतौ विरहिणीपद्धतौ अयमन्त्यः श्लोकः । प प्रतौ अत्र नोपलभ्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

289 बुद्धतत्त्वस्य लोकोऽयं जडोन्मत्तपिशाचवत् ।
बुद्धतत्त्वोऽपि लोकस्य जडोन्मत्तपिशाचवत् ॥२

290 युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥३

291 नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः ।
विजानन्नपि योगीन्द्रो जडवल्लोकमाचरेत् ॥४

292 अहेरिव गणा(?जना)द्भीतः सन्मानान्नरकादिव ।
राक्षसीभ्य इव स्त्रीभ्यस्तं देवा योगिनं विदुः ॥५

293 अपुण्यपुण्योपरमे यं पुनर्भवनिर्भयाः ।
शान्ताः संन्यासिनो यान्ति तस्मै मोक्षात्मने नमः ॥६

294 या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जागर्ति भूतानि सा निशा पश्यतो मुनेः ॥७

[ भगवद्गीता, २, ६९]

295 कुणपः कामिनी भक्ष्यमिति तिस्रो विकल्पनाः ।
योषिति ध्यानयोगेन योगिनः कामिनः शुनः ॥८

296 प्रज्ञातब्रह्मतत्त्वोऽपि स्वर्गीयैरेष खेलति ।
गृहस्थसमयाचारप्रक्रान्तैः सप्ततन्तुभिः ॥९

[अनर्घराघव, २,३५]

297 अविद्याबीजविध्वंसादयमार्षेण चक्षुषा ।
कालौ भूतभविष्यन्तौ वर्तमानमवीविशत् ॥१०

[अनर्घराघव, २,३४]

298 येन केनचिदाच्छन्नो येन केनचिदाशितः ।
यत्र क्वचन शायी यस्तमाहुर्मुक्तलक्षणम् ॥११

अथ सिंहः* ।

299 मत्तेभकुम्भनिर्भेदरुधिरारुणपाणिना ।
हरिणा हरिणाः स्पर्धां वराकाः कुर्वते कथम् ॥१

---

291. ख निर्भराः । 292. शोभनं मनो यस्य इति प प्रतौ टिप्पणी ॥ 295. ख० 'कुणपं' । 296. ख० प्रतौ न विद्यते । 297. प० 'आर्षेणाचक्षुषा' । 298. ख० 'यत्र न क्वचन.' ।
*ख० अथ सिंहप्रक्रमः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

300 वरमुन्नतलाङ्गूलात्सटाधूननभीषणात् ।
सिंहात्पादप्रहारोऽपि मा शृगालाधिरोहणम् ॥१

401 उत्तुङ्गमत्तमातङ्गमस्तकन्यस्तलोचनः ।
आसन्नमपि सारङ्गमीक्षते न मृगाधिपः ॥२

402 कोपादेकतलाघातनिपतन्मत्तदन्तिनः ।
हरेर्हरिणयुद्धेषु कियान्व्याक्षेपविस्तरः ॥४

403 मृगारिं वा मृगेन्द्रं वा हरिं व्याहरताज्जनः ।
तस्य द्वयमपि व्रीडा क्रीडादलितदन्तिनः ॥५

404 पदे पदे गजेन्द्राणां दुन्दुभिर्वावदीति यत् ।
मन्युना तेन मन्येऽहं वने वसति केसरी ॥६

405 तावद्गर्जन्ति मातङ्गा वने मदभरालसाः ।
शिरोविलग्नलाङ्गूलो यावन्नायाति केसरी ॥७

406 निपतन्ति न मातङ्गकुम्भपाटनलम्पटाः ।
वल्गत्स्वपि कुरङ्गेषु मृगारेर्नखराः खराः ॥८

407 सिंहिकासुतसंत्रस्तः शशः शीतांशुमाश्रितः ।
जग्रासे साश्रयं तत्र तमन्यः सिंहिकासुतः ॥९

408 किं कूर्मः क उपालभ्यो यत्रेदमसमञ्जसम् ।
का काकिण्यपि सिंहस्य मूल्यं कोटिस्तु दन्तिनः ॥१०

409 शशैर्लीनं मृगैर्नष्टं वराहैर्वलितं रुषा ।
हयानां ह्रेषितं श्रुत्वा सिंहैः पूर्ववदासितम् ॥११

410 मृगैर्व्याप्तं सदा क्षेत्रं रक्ष्यते तृणमानुषैः ।
सिंहैस्तु तत्परिक्रान्तं न गजैर्न च वाजिभिः ॥१२

411 मत्तेभकुम्भनिर्भेदकठोरनखराशनिः ।
मृगारिरिति नाम्नैव लघुतामेति केसरी ॥१३

[भर्तृहरि, सु. सं. ६३८]

**अथ वर्षा ।**

312 गर्ज वा वर्ष वा मेघ मुञ्च वाशनितोमरम् ।
गणयन्ति न शीतोष्णं वल्लभाभिमुखा नराः ॥१

---

300 ख० वरमुत्तुङ्गलाङ्गूलात् । 303 ख. 'व्याहरतां जनः' । 305 प. 'यावन्नायान्ति.' ।
312. ख प्रतौ न विद्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

313 स्फुरन्तः पिङ्गलाभासाः पृथिव्यामिन्द्रगोपकाः ।
सरक्तवाताः(न्ताः) पान्थस्त्रीजीवा इव चकासति ॥२

314 हसतीव बलाकाभिर्नृत्यतीव तडिद्भुजैः ।
रोदतीवाम्बुधाराभिरुन्मत्तक इवाम्बरम् ॥३

315 कशाभिरिव हैमीभिर्विद्युद्भिरभिताडितम् ।
स्तनत्यन्तर्गतावर्ष(?)वेदनार्तनि[भि]वाम्बरम् ॥४

[वाल्मीकिरामायण, ४, २७, ११]

316 रतसंमर्दविच्छिन्ना स्वर्गस्त्रीहारपङ्क्तयः ।
पतन्तीवाकुला दिक्षु तोयधारा मधुव्रताः(?) ॥५

317 भृशं शुशुभिरे शुभ्रैर्दिशः कुटजकुड्मलैः ।
मेघरुद्धवियन्मार्गावतीर्णैरिव तारकैः ॥६

318 अकालजलदच्छन्नमालोक्य रविमण्डलम् ।
चक्रवाकयुगं रौति रजनीभयशङ्कया ॥७

319 मालतीमुकुले भाति मञ्जुगुञ्जन्मधुव्रतः ।
प्रयाणे पञ्चबाणस्य शङ्खमापूरयन्निव ॥८

320 निलीयमानैश्च खगैः संमीलद्भिश्च पङ्कजैः ।
विकसन्त्या च मालत्या ज्ञायतेऽस्तं गतो रविः ॥९

321 जहुरुन्मार्गगामीनि निम्नगाम्भांसि सर्वतः ।
मनांसि दुर्विनीतानां व्याप्य लक्ष्मीं नवामिव ॥१०

322 मेघोदरविनिर्मुक्ताः कल्हारस्पर्शशीतलाः ।
शक्या अञ्जलिभिः पातुं वाताः केतकगन्धिनः ॥११

दशैते वाल्मीकेः ।

[वाल्मीकिरामायण, ४, २७, ८]

323 अतसीपुष्पसंकाशं संवीक्ष्य जलदागमं ।
ये वियोगेऽपि जीवन्ति न तेषां विद्यते भयम् ॥१२

324 नीलमेघशुकाघातदलितादर्कदाडिमात् ।
कुलाभिरिव पिङ्गाभिर्भूः विभातीन्द्रगोपकैः ॥१३

---

313. ख प्रतौ न विद्यते । 314–317 श्लोकाः ख प्रतौ न विद्यन्ते । 319. ख० मुञ्जुगुञ्जन्मधुव्रतः । 320 प० 'जायतेऽस्तं' । 324 ख प्रतौ न विद्यते । प० विभान्तीन्द्रगोपकैः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

325 वनिताचित्तचपला तडिदम्भोदकुक्षिषु ।
न तिष्ठति चिरं लक्ष्मीरपात्राङ्कमिवागता ॥१४

326 कलुषमधुरं चाम्भः सर्वं सर्वत्र साम्प्रतम् ।
अनार्जवजनस्येव कृतकव्याहृतं वचः ॥१५

327 सेन्द्रचापैः श्रिता मेघैर्निपतन्निर्झरा नगाः ।
वर्णकम्बलसंवीता बभुर्मत्तद्विपा इव ॥१६

328 अदृष्टपूर्वमस्माभिर्यदेतद्दृश्यतेऽधुना ।
विषं विषधरैः पीतं मूर्च्छिताः पथिकाङ्गनाः ॥१७

**अथ नीतिः ।**

329 यथागतं गतं भृङ्गैः प्रम्लानं पल्लवैर्निजैः ।
पश्य स्वपरयोर्भेदं विभग्ने चन्दनद्रुमे ॥१

330 यस्य विप्रियमन्विच्छेत् ब्रूयात् तस्य सदा प्रियम् ।
व्याधा मृगवधं कर्तुं गेयं गायन्ति सुन्दरम् ॥२

331 नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।
स एव प्रच्युतः स्थानाच्छुनाऽपि परिभूयते ॥३

332 चलत्तृणादपि मृगा बिभ्यते मृत्युशङ्कया ।
व्याधे विश्वासमायान्ति क उपायैर्न वञ्च्यते ॥४

333 तेजस्विनि क्षमोपेते नातिकार्कश्यमाचरेत् ।
अतिनिर्मथनादग्निश्चन्दनादपि जायते ॥५

334 अनुपासितवृद्धानामनाश्रितमहीभुजाम् ।
आचारमुख्याः सुहृदां दूरे धर्मार्थमन्मथाः ॥६

335 अत्यासन्ना विनाशाय दूरस्था न फलप्रदाः ।
सेव्या मध्यमभावेन नृपवह्निगुरुस्त्रियः ॥७

336 मृदुनापि हि साध्यन्ते कर्मणा स्वार्थसिद्धयः ।
असृक् पिबति तन्वङ्गी जलौका न च लक्ष्यते ॥८

337 भीतः पलायमानो वा नान्वेष्टव्यो बलीयसा ।
कदाचित् शूरतामेति मरणे कृतनिश्चयः ॥९

---

326 ख० प्रतौ न विद्यते । 327 ख० मेघैर्नीरैर्निर्झरा' । 330 प० 'मृगबधुं' ।
332 प 'बिभ्यतो' । 334 प० 'अवारमुख्या सुहृदाः' । ख० •मनाथितमहीभुजाम्' ।

338 अतथ्यान्यपि तथ्यानि दर्शयन्ति विचक्षणाः ।
समे निम्नोन्नतानीव चित्रकर्मविदो जनाः ॥१०
339 यो यमर्थं प्रार्थयते तदर्थं च घटेत यः ।
सोऽवश्यं तमवाप्नोति श्रान्तश्चेन्न निवर्तते ॥११
340 अर्द्धाङ्गुलपरीणाहजिह्वाप्रयासभीरवः ।
सर्वाङ्गीणपरिक्लेशमबुधाः कर्म कुर्वते ॥१२
341 समुद्रमिव राजानमाश्रितास्तत्फलैषिणः ।
समूलं वाऽपि नश्यन्ति पारं वा यान्ति संपदः ॥१३
342 जीयन्तां दुर्जया देहे रिपवश्चक्षुरादयः ।
जितेषु तेषु लोकोऽयं समस्तोऽपि त्वया जितः ॥१४
343 स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजङ्गमः ।
हसन्नपि नृपो हन्ति मानयन्नपि दुर्जनः ॥१५
344 शतेषु जायते शूरः सहस्रेषु विचक्षणः ।
दाता शतसहस्रेषु वक्ता भवति वा न वा ॥१६
345 यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥१७

[ अनर्घराघव, १,४ ]

346 अकृत्वा परसंतापमगत्वा खलनम्रताम् ।
अमुक्त्वा महतां मार्गं यदल्पमपि तद्बहु ॥१८
347 सर्वे यत्र विनेतारः सर्वे पण्डितमानिनः ।
सर्वे महत्त्वमिच्छन्ति तद्वृन्दमवसीदति ॥१९
348 क्रियतेऽभ्यर्हणीयाय सज्जनाय यथाञ्जलिः ।
ततः साधुतरः कार्यो दुर्जनाय शिवार्थिना ॥२०
349 अरिषड्वर्ग एवायं तस्यास्तात पदानि षट् ।
तेषामेकमपि च्छिन्दन् खञ्जय भ्रमरीं श्रियम् ॥२१

[ अनर्घराघव,६,९]

340 ख. 'जिह्वाग्रायासभीरवः'। 341 श्लोकोऽयं ख प्रतौ ३३० श्लोकानन्तर मुपलभ्यते ॥ 344 इन्द्रियाणां जयेच्छूरः धर्मं चरति पण्डितः । सत्यवादी भवेद्वक्ता दाता भूतहितेरतः ॥ इति प प्रतौ 345 प. 'यान्त्यन्यायप्रवृत्तस्य' ॥ 349 ख. एवायमस्याः । प. तेषामेकमछिन्दन् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

350 गणस्य दाता क्षीयेत गणस्य तु न किञ्चन।
गणाद्ग्रहीता वर्धेत गणस्य तु न किञ्चन ॥२२

351 स्वतो न कश्चन गुरुर्लघुर्वा नापि कश्चन ॥
उचितानुचिताचारवश्ये गौरवलाघवे ॥२३

352 यदीच्छसि वशीकर्तुमक्लेशेन जगत्त्रयम्।
परापवादसस्येभ्यश्चरन्तीं गां निवारय ॥२४

353 अनवस्थितचित्तस्य प्रसादोऽपि भयङ्करः।
सर्पिण्यत्ति किल स्नेहात् स्वापत्यानि न कामतः ॥२५

354 वने रतिर्विरक्तस्य रक्तस्य तु जने रतिः।
अनवस्थितचित्तस्य न वने न जने रतिः ॥२६

355 यद्यत्परवशं कर्म तत्तद्यत्नेन वर्जयेत्।
यद्यदात्मवशं तु स्यात् तत्तत्कुर्वीत सर्वतः ॥२७

356 सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्।
एतदुक्तं समासेन लक्षणं दुःखसौख्ययोः ॥२८

357 अधोमुखं त्रयं नेयं नेयमूर्ध्वमुखं त्रयम्।
वापीकूपतडागानि यशो देवकुलं कुलम् ॥२९

358 त्रयः स्थानं न मुञ्चन्ति काकाः कापुरुषाः मृगाः।
मुञ्चन्ति त्रयः स्थानं सिंहाः सत्पुरुषा गजाः ॥३०

359 सप्तैतानि न पूर्यन्ते पूर्यमाणान्यपि क्वचित्।
ब्राह्मणाग्निर्यमो राजा समुद्र उदरं गृहम् ॥३१

360 सद्यः प्रीतिकरो दाता सद्यश्चित्तहराः स्त्रियः।
सद्यः पुष्टिकरं तोयं सद्यः पतति विग्रहा ॥३२

361 दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलम्।
सत्यपूतं वदेद्वाक्यं मनःपूतं समाचरेत् ॥३३

362 सत्यं ब्रूयात्प्रियं ब्रूयात् न ब्रूयात्सत्यमप्रियम्।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥३४

---

350 ख. गणाद्ग्रहीत ॥ 351 प. गुरुलर्घुर्वापि न कस्य च। 353 ख. स्वापत्यान्नि न कामतः। 355 ख. कुर्वन्ति ॥ 356 ख. सुखदुःखयोः। 357 ख तडागा यशो। 361 प. क्षिपेत्पादं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

363 अपकारिणि कोपश्चेत् कोपे कोपः कथं न ते ।
धर्मार्थकाममोक्षाणां प्रसह्य परिपन्थिनि ॥३५

364 धर्मार्थकाममोक्षाणां प्रसह्य परिपन्थिनि[नम्] ।
दुर्वारमरिषड्वर्गं दूरतः त्यजतः सुखम् ॥३६

365 निद्राभङ्गं कथाच्छेदं सारथ्यं क्रयविक्रयम् ।
शक्रोऽपि लघुतां याति पञ्चैतानि समाचरन् ॥३७

366 प्रस्तुतस्य विरोधेन ग्राम्यः सर्वोऽप्युपक्रमः ।
वीणायां वाद्यमानायां वेदोद्गारो न राजते ॥३८

367 अम्भो(?अपो)ग्निर्ब्रह्मतः क्षत्रमश्मतो लोहमुत्थितम् ।
तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥३९

368 यत्रात्मीयो जनो नास्ति भेदस्तत्र न विद्यते ।
कुठारैर्दण्डनिर्मुक्तैश्छिद्यन्ते तरवः कथम् ॥४०

369 विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा ।
अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते ॥४१

370 त्रय एवाधमा राजन् भार्या दासस्तथा सुतः ।
यत्ते(?) समधिगच्छन्ति यस्य ते तस्य तद्धनम् ॥४२

371 स जयी यस्य मातङ्गा यस्याश्वास्तस्य मेदिनी ।
कोशो यस्य स दुर्धर्षो दुर्गं यस्य स दुर्जयः ॥४३

372 मन्त्रिणां भिन्नसंधाने भिषजां सान्निपातके ।
कर्मणि व्यज्यते प्रज्ञा स्वस्थे को वा न पण्डितः ॥४४

373 वनानि दहतो वह्नेः सखा भवति मारुतः ।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम् ॥४५

[भर्तृहरि, सु. सं. ७०३]

374 सर्वथाऽपि त्वया राजन् त्रिविधं निष्प्रयोजनम् ।
न स्थातव्यं न गन्तव्यं न वक्तव्यं कथञ्चन ॥४६

375 घोटकः कृषिनाशाय वित्तनाशाय कुञ्जरः ।
श्यालकः सद्मनाशाय सर्वनाशाय मातुलः ॥४७

---

363 ख. अपकारणि । 367 प. तप्तोऽग्नि । 370 प. यत्र एवाधुना राजन् ।
372 प. स्वास्थे । 373 ख० कस्यास्ति गौरवम् । 375 ख. शालकः..सर्वनाशाय मातुकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

376 उत्पन्नपरितापस्य बुद्धिर्भवति यादृशी ।
तादृशी यदि पूर्वं स्यात्कस्य न स्यात्फलोदयः ॥४८

377 वर्जयेत्कासवान् चौर्यं निद्रावान् चर्मचोरिकाम् ।
रोगवान् रसनालौल्यं धनवान् सर्वतः कलिम् ॥४९

378 कितवा यं प्रशंसन्ति यं प्रशंसन्ति चारणाः ।
बन्धक्यो यं प्रशंसन्ति स राजन् पुरुषाधमः ॥५०

379 आज्ञाभङ्गो नरेन्द्राणां वृत्तिच्छेदो द्विजन्मनाम् ।
पृथक्शय्या च नारीणामशस्त्रो वध उच्यते ॥५१

380 पादमायान्निधिं कुर्यात् पादं वित्ताय स्व(?स)द्वयेत् ।
धर्मोपभोगयोः पादं पादं भर्तव्यपोषणे ॥५२

381 परस्त्री मन्दरूपाऽपि विकरोत्येव मानसम् ।
यदपथ्यं शरीरस्य तद्धि मन्दाय रोचते ॥५३

382 ग्रहाणां चरितं स्वप्नं निमित्तमुपयाचितम् ।
फलन्ति काकतालीयं तेभ्यः प्राज्ञा न बिभ्यति ॥५४

383 यथा व्याघ्री हरेत्पुत्रान् दंष्ट्राभिर्न [तु] पीडयेत् ।
भीता पतनभेदाभ्यां तथा वर्णान् समुच्चरेत् ॥५५

384 त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिःर्दिनैः ।
अत्युग्रपुण्यपापानामिहैव फलमश्नुते ॥५६

385 योनौ कर्मणि बीजे च यस्य न स्याद्व्यतिक्रमः ।
तस्य कृच्छ्रगतस्यापि न पापे रमते मतिः ॥५७

386 ग्रामो नास्ति कुतः सीमा पत्नी नास्ति कुतः सुतः ।
प्रज्ञा नास्ति कुतो विद्या धर्मो नास्ति कुतो दया ॥५८

387 अनागतविधातारमप्रमत्तमकोपनम् ।
चिरारम्भमदीनं च नरं श्रीरुपतिष्ठते ॥५९

388 धनमस्तीति वाणिज्यं किञ्चिदस्तीति कर्षणम् ।
सेवा न किञ्चिदस्तीति नाहमस्मीति साहसम् ॥६०

---

377 ख. धनवानन्यतः कलिम् । 378 ख. पुरुषोत्तमः । 382 ख. प्रतौ न विद्यते । 383 ख. सीतापतनभेदा०; समुद्गरेत् । 384 ख. प्रतौ न विद्यते । 385 प. प्रतौ न विद्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

389 सुमन्त्रिते सुविक्रान्ते सुकृते सुविचारिते ।
प्रारम्भे कृतबुद्धिनां सिद्धिरव्यभिचारिणी ॥६१
390 चतुरः सृजता पूर्वमुपायांस्तेन वेधसा ।
न सृष्टः पञ्चमः कोऽपि गृह्यन्ते येन योषितः ॥६२
391 जल्पन्ति सार्धमन्येन पश्यन्त्यन्यं सविभ्रमाः ।
हृद्गतं चिन्तयन्त्यन्यं प्रियः को नाम योषिताम् ॥६३
[भर्तृहरि. सु. सं. २४७]
392 यदन्तस्तन्न जिह्वायां यज्जिह्वायां न तद्बहिः ।
यद्बहिस्तन्न कुर्वन्ति विचित्रचरिताः स्त्रियः ॥६४
393 सभा वा न प्रवेष्टव्या वक्तव्यं वाऽसमञ्जसम् ।
अब्रुवन्विब्रुवन्वाऽपि नरो भवति किल्बिषी ॥६५
394 दूरस्थेन प्रवृत्तस्य जनकोऽपि प्रकुप्यति ।
अनुजायस्य(?) पन्थानं स कृसोऽप्येतदासताम्(?) ॥६६

अथ कृपणः ।

395 विडम्बनैव पुंसि श्री परप्रणयपांसुला ।
कान्ति कामिव कुर्वीत कुणौ कङ्कणकल्पना ॥१
396 दारिद्र्यस्य परा मूर्तिर्याच्ञा न द्रविणाल्पता ।
जरद्गवधनः शम्भुः तथाऽपि परमेश्वरः ॥२
397 कृपणेन शवेनेव मृतेनापि न दीयते ।
मांसं वर्धयता तेन काकस्योपकृतिः कृता ॥३
398 उदारचरितात् रागी याचितः कृपणोऽधिकः ।
एको दत्ते धनं प्राणानन्यः प्राणांस्ततो धनम् ॥४
399 अक्षरद्वयमभ्यस्तं नास्ति नास्तीति यत्पुरा ।
तदिदं देहि देहीति विपरीतमुपस्थितम् ।.५
400 कण्ठे गद्गदभाषित्वं मुखे वैवर्ण्यवेपथू ।
मरणे यानि चिह्नानि तानि चिह्नानि याचके ॥६

390 155 तम श्लेकोऽयं पुनरावृत्तोत्र प. प्रतौ स्त्रीप्रशंसायां वर्तते। नोपलभ्यतेऽत्र स्थाने ख प्रतौ। 394 प० प्रतौ श्लोकोऽयं दुर्वाच्यः । ख. प्रतौ नोपलभ्यते । 395 प० विडंविनैव; प० परप्रणयपांसुले । 400 ख. प्रतौ नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

401 शरणं किं प्रयातानि विषवन्मारयन्ति किम् ।
न त्यज्यन्ते न भुज्यन्ते कृपणेन धनानि यत् ॥७

402 कृपणेन समो दाता न भूतो न भविष्यति ।
अस्पृशन्नेव वित्तानि यः परेभ्यः प्रयच्छति ॥८

403 दानोपभोगशून्येन धनेन धनिनो यदि ।
भवामः किं न तेनैव धनेन धनिनो वयम् ॥९

404 दानोपभोगवन्ध्या या सुहृद्भिर्या न भुज्यते ।
पुसां स्याद्यदि सा लक्ष्मीरलक्ष्मी कतमा भवेत् ॥१०

405 कृत्वोपकारं यस्तस्माद्वाञ्छति प्रत्युपक्रियाम् ।
दीनस्तृष्णाविधेयत्वाद्भ्रान्तमप्युपकेढि सः ॥११

406 ददासि यच्च विप्रेभ्यो यच्चाश्नासि दिने दिने ।
तत्ते धनमहं मन्ये शेषं कस्यापि रक्षसि ॥१२

## अथ दैवम् \

407 कलत्रनिगडं दत्त्वा न सन्तुष्टः प्रजापतिः ।
भूयोऽप्यपत्यदानेन बबन्ध गलशृङ्खलाम् ॥१

408 यद्भावि न तद्भावि भावि यन्न तदन्यथा ।
इति चिन्ताविषघ्नोऽयमगदः किं न पीयते ॥२
[भर्तृहरि,सु. सं, ६६१]

409 ये प्रातस्ते न मध्याह्ने ये मध्याह्ने न ते निशि ।
ये निशायां न तेऽन्येद्युरिन्द्रजालमहो विधेः ॥३

410 परीक्ष्य सत्कुलं विद्यां वयः शौर्यं सुशीलताम् ।
विधिर्ददाति निपुणः कन्यामिव दरिद्रताम् ॥४

411 न केवलं मनुष्येषु दैवं देवेष्वपि प्रभुः ।
सति मित्रे धनाध्यक्षे चर्मप्रावरणो हरः ॥५

412 धिग्दैवं लोचने स्वच्छे पात्रं कज्जलभस्मनः ।
सच्छिद्रो मध्यकुटिलः कर्णः स्वर्णस्य भाजनम् ।६

---

401 ख. शरणं किं न प्रयातानि । 403 ख. किं गतेनैव । 404 ख. वन्ध्या य सुहृद्भिः । 405 ख. कृतोपकारं । 406 ख. यच्चाश्नाति । 407 प. ०विषघ्नोऽयमदः किन्न धीयते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

413 पिबन्ति मधु पद्मेषु भृङ्गाः केसरधूसराः ।
हंसाः सेवालमश्नन्ति धिग्दैवमसमञ्जसम् ॥७

414 धातस्तात विरुद्धोऽपि द्वितयं मा कृथाः सताम् ।
भृत्यत्वमविशेषज्ञे स्नेहमन्यरते जने ॥८

[भर्तृहरि.सु.सं, ५४६]

415 न स प्रकारः कोऽप्यस्ति येनेयं भवितव्यता ।
छायेव निजकायस्य लङ्घ्यते जातु जन्तुभिः ॥९

416 किं करिष्यति पाण्डित्यं विनयो विक्रमोऽपि वा ।
दैवो यस्य छलान्वेषी करोति विफलान् गुणान् ॥१०

अथ वैद्यकम् ।

417 अध्वा जरा मनुष्याणां अनध्वा दन्तिनां जरा ।
अमैथुनं जरा स्त्रीणामश्वानां मैथुनं जरा ॥१

418 जीर्णे भोजनमात्रेयः कपिलः प्राणिनां दया ।
बृहस्पतिरविश्वासः पाञ्चालः स्त्रीषु मार्दवम् ॥२

419 दिवा न भुज्यते यच्च यच्च रात्रौ न भुज्यते ।
जीर्णे न भुज्यते यत्र(च) तेन जीर्यन्ति जन्तवः ॥३

420 शीतमध्वा कदन्नानि व्यतीतवयसः स्त्रियः ।
मनसः प्रातिकूल्यं च जरायाः पञ्च हेतवः ॥४

421 क्वचिदुष्णं क्वचित्शीतं क्वचित्क्वथितशीतलम् ।
क्वचिद्भेषजसंयुक्तं न क्वचित् वारि वार्यते ॥५

422 आतपः कटुको रूक्षश्छाया मधुरशीतला ।
कषायमधुरा ज्योत्स्ना सर्वदोषहरं तमः ॥६

423 वर्जयेद्द्विदलं शूली मांसं कुष्ठी घृतं ज्वरी ।
नवमन्नमतिसारी चक्षुरोगी च मैथुनम् ॥७

424 अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ॥८

425 व्यायामः कफनाशाय वातनाशाय मर्दनम् ।
स्नानं च पित्तनाशाय कुर्यादेतत्त्रयं ततः ॥९

---

417 ख. हयानां मैथुनं जरा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ वीरः ।

426 पञ्चैव पुत्रास्ते मातर्भविष्यन्ति न संशयः ।
सकर्णा वा हते पार्थे सार्जुना वा हते मयि ॥१

427 आदित्यमिव दुष्प्रेक्ष्यं समुद्रमिव दुस्तरम् ।
वेदार्थमिव दुर्बोधं पश्य कर्ण धनञ्जयम् ॥२

428 मयि जीवति यत्तातः केशग्रहमवाप्नुयात् ।
कथमन्ये करिष्यन्ति पुत्रेभ्यः पुत्रिणः स्पृहाम् ॥३

429 रसनाग्रे त्रयो वेदा कराग्रे सशरं धनुः ।
द्वाभ्यामपि भयं द्रोणे शापादपि शरादपि ॥४

430 कौशिकस्वीकृतस्यापि यदा ज्ञातिक्रमादभूत् ।
त्रिशङ्कोरुपभोगाय न द्यौरपि न भूरपि ॥५ [अनर्घराघव १,२१]

431 न सदश्वा कशाघातं न सिंहो घनगर्जितम् ।
परैरङ्गुलिनिर्देशं न सहन्ते तरस्विनः ॥६

432 रसनाग्रेषु नीचानां हृदयेषु मनीषिणाम् ।
वीराणां वसति क्रोधः क्रियासु कृतविस्तरः ॥७

433 श्रोता यैर्न भवेद्योगी देवरूपो न यैः रिपुः ।
यैरात्मसदृशो नार्थी किं तैः काव्यैर्बलैर्धनैः ॥८

434 ददतो युध्यमानस्य पठतः पुलको न चेत् ।
आत्मनश्च परेषां च धिग्दानं पौरुषं वचः ॥९

435 पूजितः पाणिमुत्तानं जितः कुण्डलितं धनुः ।
पुनः करोति चेदग्रे धिग्दानं धिक् च पौरुषम् ॥१०

436 बहवः पल्लवोऽप्यत्र नराः शस्त्राण्यधीयते ।
विरला वैरिखड्गाग्रधारापातसहिष्णवः ॥११

437 नात्युच्चं शिखरो मेरोर्नातिनीचं रसातलम् ।
नात्यपारं पयोराशिर्व्यवसायसहायिनः ॥१२

438 मा भैष्ट नैते निस्त्रिंशा नीलोत्पलदलत्विषः ।
एते वीरावलोकिन्याः श्रियो नयनविभ्रमाः ॥१३

---

436 ख. शस्त्राण्यधीयते । 437 प. नात्पार पंयोराशिः । 438 प. नेति निसृशा । ख. वीरावलोकन्या श्रियो० ।

439 सर्वराजकदुर्धर्षं सर्वदेवमयं धनुः ।
भञ्जता रामभद्रेण विजिग्ये भुवनद्वयम् ॥१४
440 अग्रजं वा दशग्रीवमनुजं वा विभीषणम् ।
अन्वयव्यतिरेकाभ्यां वीरः कमभिषेक्ष्यति ॥१५

## अथ प्रकीर्णकम्[1]

441 मध्यदिनार्कसंतप्तः सरसीं गाहते गजः ।
मन्ये मार्तण्डगृह्यानि पद्मान्युद्धर्तुमुत्सुकः ॥१
442 कण्टकान्तैरसच्छायैः कर्कशैः कुटिलात्मभिः ।
वानस्पत्यप्रसूरेभिः करीरैर्मरुमेदिनी ॥२
443 स्फटिकस्य गुणो योऽसौ स एवायाति दोषताम् ।
धत्ते स्वच्छतया छायां यतो बलवतामपि ॥३
444 हन्त चिन्तामणिभ्रान्त्या याचितोऽसि स्तुतोऽसि यत् ।
तत्सर्वं वृत्तपाषाण क्षम्यतामर्थिनो वयम् ॥४
445 तालस्तब्धतयारब्धस्तयैव सह नश्यति ।
पतत्यङ्गारवर्षे वा वाति वा प्रबलेऽनिले ॥५
446 भवावकेशी यदि वा नेदिष्टफलदो भव ।
दीर्घसूत्रितयाऽप्येवं तव ताल गोविपिनाः(?) ॥६
447 गन्धैकसारो विफलः सेव्यश्चन्दनपादपः ।
भुजङ्गा अप्यनाहाराः सेवकाः सदृशो विधिः ॥७
448 प्रत्यग्रैः पर्णनिचयैस्तरुर्यैरेव वर्धितः ।
जीर्णांस्त्यजति तानेव किं वा चित्रं कुजन्मनः ॥८
449 येन पाषाणखण्डस्य मूल्यमल्पं वसुन्धरा ।
अनस्तमितसारस्य तेजसस्तद्विजृम्भितम् ॥९
450 लूनः खलीकृतः क्षुण्णः शालिर्यैरेव मानवैः ।
आर्तांस्तानेव पुष्णाति क्षेत्रजे विकृतिः कुतः ॥१०
451 तुभ्यं दासेर दासीयं(?) बदरी यदि रोचते ।
एतावता [हि] किं द्राक्षा न साक्षादमृतप्रपा ॥११

---

445 ख. प्रतौ न विद्यते । 446 ख. प्रतौ न विद्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

452 यथापल्लवपुष्पाढ्या यथापुष्पफलर्द्धयः ।
यथाफलर्द्धिप्रारोहा हा मनः क्वागमन् द्रुमाः ॥१२

453 पाषाणशकलाधीनो यद्गुणग्रामनिर्णयः ।
स्वर्णं तत्किं न तत्रैव विलीनं दहनोदरे ॥१३

454 साध्वेव तद्विधावस्य वेधाः क्लिष्टः न यन्मुधा ।
स्वरूपाननुरूपेण चन्दनस्य फलेन किम् ॥१४

455 मया बदरलुब्धेन वृक्षाणामनभिज्ञया ।
वने कण्टकसादृश्यात् खदिरः पर्युपासितः ॥१५

456 महातरुर्वा भवति समूलो वा विनश्यति ।
नान्तरप्रक्रियामेति न्यग्रोधकणिकाङ्कुरः ॥१६

457 पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ।
धन्या महीरुहो येषां निराशा यान्ति नार्थिनः ॥१७

458 छायावन्तो गतव्यालाः स्वारोहा फलदायिनः ।
मार्गद्रुमा महान्तश्च परेषामेव भूतये ॥१८

[काव्यालंकार ३, १८]

459 अगतीनां खलीकारान्न दुःखमपि जायते ।
भवन्त्यशोकाः प्रायेण साङ्कुराः पादताडिताः ॥१९

460 भिद्यन्तेऽनुप्रविश्यन्ते यो यथारुच्युपाधिना ।
विशुद्धिः कीदृशी तस्य जडस्य स्फटिकात्मनः ॥२०

461 मरौ नास्त्येव सलिलं कृच्छ्रात् यदपि लभ्यते ।
तत्कटुस्तोकमुष्णं च न करोति वितृष्णताम् ॥२१

462 क्रौञ्चं विहाय स्वं पुत्रं पितरं च हिमालयम् ।
प्रविश्य जलधिं पक्षौ रक्षतानेने किं कृतम् ॥२२

[अनर्घराघव; ७,२३]

463 नीरसान्यपि रोचन्ते कर्पासस्य फलानि नः ।
येषां गुणमयं जन्म परेषां गुह्यगुप्तये ॥२३

---

455 ख प्रतौ न विद्यते । 457 ख० 'पुष्पपत्रफल०' । 460 ख प्रतौ न विद्यते
462 ख. 'विहाय पुत्रं च पितरं' । 463 ख प्रतौ न विद्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ पुत्रः ।

464 न पुत्रः पितरं द्वेष्टि स्वभावात् स्वस्य रेतसः ।
यः पुत्रः पितरं द्वेष्टि तं विद्यादन्यरेतसम् ॥१

465 पुत्र पुत्रेषु जातेषु यदा किञ्चित् स्मरिष्यसि ।
अ(त्वम)स्मत्कृतस्नेहानां तदा वेत्ता भविष्यसि ॥२

466 जायमानो हरेद्भार्यां वर्धमानो हरेद्धनम् ।
म्रियमाणो हरेत्प्राणान् नास्ति पुत्रसमो रिपुः ॥३

467 उत्तमाः स्वगुणैः ख्याता मध्यमा पितृमातृभिः ।
अधमा मातुलैः ख्याताः श्वसुरैश्चाधमाधमाः ॥४

468 वत्स यन्न त्वयाऽधीतं मृगनेत्रासु रात्रिषु ।
येन त्वं विदुषां मध्ये पङ्के गौरिव सीदसि ॥५

469 जीवतोर्वाक्यकरणात् क्षपाहे भूरिभोजनात् ।
छायायां पिण्डपात्राच्च त्रिभिरेव सुतः सुतः ॥६

470 न खानिता पुष्करिण्यो रापिता न महीरुहः ।
मातुर्यौवनचोरेण तेन जातेन किं कृतम् ॥७

471 अजातमृतमूर्खेभ्यो मृताजातौ सुतौ वरम् ।
तौ स्तोकशोकदौ पित्रोर्मूर्खस्तु बहुशोकदः ॥८

472 पुत्रोत्पत्तिविपत्तिभ्यां न परं सुखदुःखयोः ।
ब्रह्महत्याश्वमेधाभ्यां न परं पापपुण्ययोः ॥९

473 तथा भव यथा तात त्रैलोक्योदरदर्पणे ।
विशेषैर्भूषितस्तैस्तैर्नित्यमात्मानमीक्ष्यसे ॥१०

[नलचम्पू ४, १७]

474 किं तेन जातु जातेन मातुर्यौवनहारिणा ।
आरोहति न यस्तस्य वंशस्याग्रे ध्वजो यथा ॥११

[नलचम्पू, ४,१९] त्रिविक्रमस्यैते ।

*अथ सख्युपहासाः ।

475 नायातः सामदानाभ्यामिति भेदेऽपि दर्शिते ।
साधु यद्दुर्विनीतस्य मया दण्डो निपातितः ॥१

---

464 ख०'यत्त्वया पुत्र नाधीतं । ख० सीदति । 469 ख. प्रतौ न विद्यते । 470 ख. प्रतौ न विद्यते । 471 प. 'चित्रो मूर्खस्तु' । 472 च. 'पुण्यपापयोः' 473 प. '०मात्मानमीक्षते' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

476 अधरो वीतरागस्ते कषाये ते विलोचने ।
विहारः कण्ठदेशस्ते दूति प्रव्रजितासि किम् ॥२

477 अनेन वीतरागेण बुद्धेनेवाधरेण ते ।
दूति निर्व्याजमाख्याता सर्ववस्तुषु शून्यता ॥३

478 किं त्वं निगूहसे दूति स्तनौ वक्त्रं च पाणिना ।
खण्डिता एव शोभन्ते शूराधरपयोधराः ॥४

479 दूति किं तेन पापेन शास्त्रातिक्रमकारिणा ।
पञ्चपञ्चनखा भक्ष्याः षष्ठी त्वं येन भक्षिता ॥५

480 पार्श्वाभ्यां सुप्रहाराभ्यां अधरे व्रणखण्डिते ।
दूति संग्रामयोग्यासि न योग्या दूतकर्मणि ॥६

481 नखदन्तक्षते क्षामे क्षन्तव्यं दूति मे त्वया ।
अक्षौहिण्यौ दशाष्टौ च मित्रार्थे निधनं गताः ॥७

482 त्वया कर्म कृतं यत्तदन्येन(न्येनाति)दुष्करम्(?) ।
शरणागतविध्वंसो छिद्रान्वेषी विदारितः ॥८॥

483 क्षामा तनुः गतिः खिन्ना नेत्रे व्यालोलतारके ।
वागस्पष्टा श्लथं वासो दूति त्वं त्वरिताऽसि किम् ॥९

484 बहुनाऽत्र किमुक्तेन दूति मत्कार्यसिद्धये ।
स्वमांसान्यपि दत्तानि वस्तुष्वन्येषु का कथा ॥१०

वररुचेः

**अथ हास्यम् ।**

485 सा पार्वतीत्यवितथं स च स्थाणुरिति स्फुटम् ।
संपृक्तावपि यावास्तां सुरताभोगनिस्पृहौ ॥१

486 स्थाणुर्वा स्यादजो वा स्यात्पशूनां स्यात्पति स वा ।
कामिनीविभ्रमाचार्यं योऽधाक्षीत् कुसुमायुधम् ॥२

487 सुभ्रुवोविभ्रमैः किञ्चित् यत् प्रकुर्वीत कामिनाम् ।
जघनेष्वेव तत्सर्वं पतत्यनपराधिषु ॥३

---

* ख. अथ सख्युपहासः । 475. प. यातः सामदाना ॥ 476 ख. प्रव्रजितः कथम् । 477 प. बुद्धेन वाधरेण । 484 ०अतोऽनन्तरं प प्रतौ 'अथ विरहिणीप्रलापाः —यत्पराधीनयोः प्रेम दैवादुत्पद्यते क्वचित् । तत्रानुसृज्य लज्जां जीवितं वा कुतः सुखम् ।' इत्यधिकः पाठ उपलभ्यते । अस्यां पद्धतौ एक एव श्लोकः वर्तते । श्लोकोऽयं ख प्रतिमनुसृत्य २८७ तम श्लोकरूपेण स्वीकृतः तेनात्रानादृतो मूलपाठे । 487 प० यत् प्रकुर्वन्ति कामिनाम्' ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

488 येनैवाम्बरखण्डेन दिवा सञ्चरते रविः ।
तेनैव निशि शीतांशुरहो दारिद्र्यमेतयोः ॥४

489 भण्डपण्डितयोर्मध्ये वरं भण्डो न पण्डितः ।
भण्डोऽपि(?हि) लभते लक्षं विलक्षो याति पण्डितः ॥५

490 काकभिक्षुकयोर्मध्ये वरं काको न भिक्षुकः ।
काकोऽपि(?हि) लभते पिण्डी न पिण्डीमपि भिक्षुकः ॥६

491 कृष्णः क्रीडितवान् गोभिरिति गोतुल्यबुद्धिषु ।
पक्षपातवती लक्ष्मीरहो देवी पतिव्रता ॥७

492 केतक्यः कण्टकैः कीर्णाः पद्मिन्यः पङ्कसंभवाः ।
विलासिन्यः सकुट्टिन्यः क रत्नमनुपद्रवम् ॥८

493 कायस्थेनोदरस्थेन मातुरामिषशङ्कया ।
अन्त्राणि यन्न भुक्तानि तत्र हेतुरदन्तता ॥९

494 काकाल्लौल्यं यमात्क्रौर्यं स्थपतेर्दृढघ(घा)तिताम् ।
आद्याक्षराणि संगृह्य कायस्थः केन निर्मितः ॥१०

495 असंधिपदविच्छेदं सरस्वत्याः प्रकुर्वताम् ।
भट्टानां चारणानां च युक्तं लक्ष्मीः प्रसीदति ॥११

**अथ चाटुपद्धतिः ।**

496 त्वं दूरमपि गच्छन्ती हृदयं न जहासि मे ।
दिनावसानच्छायेव पुरो मूलं वनस्पतेः ॥१

497 अयं ते विद्रुमच्छायो मरुमार्ग इवाधरः ।
करोति कस्य नो मुग्धे पिपासाकुलितं मनः ॥२

498 कृष्णार्जुनरक्ताऽपि दृष्टिः कर्णावलम्बिनी ।
अतिविश्वसनीयत्वं कस्य ते कलभाषिणि ॥३
[काव्यादर्श, २, ३३९]

499 निर्णेतुं शक्यमस्तीति मध्यं तव नितम्बिनी ।
अन्यथा नोपपद्येत पयोधरभरस्थितिः ॥४

500 मुग्धे धानुष्कता केऽयमपूर्वा तव दृश्यते ।
यया विध्यसि चेतांसि गुणैरेव न सायकैः ॥५
[भर्तृहरि, सु, सं, १३३]

493. ५१ पत्रस्य त्रुटेः नोपलभ्यन्ते ४९३तः ५०३ पर्यन्ताः श्लोकाः प प्रतौ ।

६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

501 साधु बाले बहिर्दूरमकारि कुचमण्डलम् ।
हृदि निमग्नमाधत्ते पीडां जानामि यादृशी ॥६

502 मृदङ्गि कठिनौ तन्वि पीनौ सुमुखि दुर्मुखौ ।
अत एव बहिर्यातौ हृदयात्ते पयोधरौ ॥७

503 मुखं ते पादपतिते किंकरे किं करे स्थितम् ।
मयि कामातुरे कोपं कोपने कोऽपनेष्यति ॥८

अथ गुणाः ।

504 गुणानां निर्गुणानां च दृश्यते महदन्तरम् ।
हाराः कण्ठगताः स्त्रीणां नूपुराणि च पादयोः ॥१

505 यत्पयोधरभारेषु मौक्तिकैर्निहितं पदम् ।
तत्प्रच्छादितरम्भाणां गुणानामेव चेष्टितम् ॥२

506 गुणेष्वनादरं भ्रातर्भूरिश्रीरपि मा कृथाः ।
संपूर्णोऽपि घटः कूपे गुणच्छेदात्पतत्यधः ॥३

507 गुणैरुत्तुङ्गतामेति नोच्चैरासनसंस्थितेः ।
प्रासादशिखरारूढः काकः किं गरुडायते ॥४

508 त्यागो गुणो वित्तवतां वित्तं त्यागवतां गुणः ।
परस्परवियुक्तौ तु वित्तत्यागौ विडम्बना ॥५

509 नागुणी गुणिनं वेत्ति गुणी गुणेषु मत्सरी ।
गुणी च गुणरागी च विरलः सरलो जनः ॥६

510 स्वयं स्वगुणविस्तारादूर्णनाभः पतत्यधः ।
तमेव संहरनूर्ध्वपदमुच्चैः समश्नुते ॥७

511 विना चक्रं गुणोद्गारः पतनायैव केवलम् ।
अत्र विप्रतिपन्नानां उर्णनाभो निदर्शनम् ॥८

अथ तपः ।

512 यद्दूरं यद्दुराराध्यं यच्च दूरे व्यवस्थितम् ।
तत्सर्वं तपसा साध्यं तपो हि दूरतिक्रमम् ॥१

513 इन्द्रियाणि पुरा जित्वा जितं त्रिभुवनं त्वया ।
स्मरद्भिरिव तद्वैरमिन्द्रियैस्त्वं पुनर्जितः ॥२

506. ख. 'भूरिः श्रीरपि' । 508 प. 'विलुञ्चना' । 512. यद्दूरे च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

514 उग्रे तपसि लीनानामिन्द्रियाणां न विश्वसेत् ।
विश्वामित्रोऽपि सोत्कण्ठं कण्ठे जग्राह मेनकाम् ॥३

515 ग्रीष्मे पञ्चतपा भूत्वा वर्षास्वभ्रावकाशकः ।
जलशायी च हेमन्ते चरेदुग्रतरं तपः ॥४

516 भूत्या स्निग्धोदरं रक्षेत्पाणिपादं च चक्षुषा ।
चक्षुः श्रोत्रं च मनसा मनो वाचं च कर्मणा ॥५

517 शीतवाततपःक्लेशान् यान् सहते स्म सेवकः ।
सहस्रांशतोऽपि ततः तपस्तप्त्वा सुखी भवेत् ॥६

518 येषां पुत्रा न विद्वांसो द्रविणं न च पुष्कलम् ।
ते कथं मत्तमातङ्गम ग्निहोत्रमुपासते ॥७

अथ तपस्विनः ।

519 प्राक्तनानां विशुद्धानां परिपाकमुपेयुषाम् ।
तपसामुपभुञ्जानाः प(फ?)लान्यपि तपस्विनः ॥१

अथ विद्या ।

520 गतेऽपि वयसि ग्राह्या विद्या सर्वात्मना बुधैः ।
इह स्याच्च न फलदा सुलभा साऽन्यजन्मनि ॥१

521 वेश्यानामिव विद्यानां मुखं कैः कैर्न चुम्ब्यते ।
हृदयग्राहिणस्तासां विरलाः पुरुषाः पुनः ॥२

अथ माया ।

522 दुर्घटत्वमविद्याया भूषणं न तु दूषणम् ।
कथञ्चित् घटमानत्वे विद्यात्वं दुर्घटं भवेत् ॥१

523 मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ।
मुक्तावस्थं जगत्सर्वं व्यामोहो बन्धकारणम् ॥२

अथ तृष्णा ।

524 तृष्णाखानिरगाधेयं दुष्पूरा केन पूर्यते ।
या महद्भिरपि क्षिप्तैः पूरणैरेव खन्यते ॥१

---

515. प. 'विचरेदुग्रतरं तपः' । 516 प. 'भृत्यासिम्नोदरं' । 517. प. सेवकाः ।
518 ख प्रतौ न विद्यते 'अथ तपस्विनः' इति पद्धतिः । अतः अयं श्लोकः नास्ति ।
521 ख. चुम्बितम् । 522. प. घनमानत्वे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

525 वलिभिर्मुखमाक्रान्तं पलितैरङ्कितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥२

526 अन्तःसारो विनिर्याति नूनमर्थितया सह ।
अन्यथा तदवस्थस्य लघिमा केन हेतुना ॥३

527 यन्मृतो-याति गुरुतां ज्ञातं तदधुना मया ।
लाघवस्यार्थिता मूलं मृतस्योपरता हि सा ॥४

अथोदारः ।

528 एकेन तिष्ठताऽधस्तात् अन्येनोपरि तिष्ठता ।
दातृयाचकयोर्भेदः कराभ्यामेव सूचितः ॥१

529 समानेऽपि दरिद्रत्वे विचित्राश्चित्तवृत्तयः ।
न दत्तमिति शोचन्ति न लब्धमिति चापरे ॥२

530 आकारमात्रविज्ञातसंपादितमनोरथाः ।
धन्यास्ते ये न शृण्वन्ति दीनाः प्रणयिनां गिरः ॥३

531 देहि देहीति जल्पन्ति त्यागिनोऽप्यर्थिनोऽपि च ।
आलोचयन्ति रभसादस्ति नास्तीति न क्वचित् ॥४

532 अहो बत महत्कष्टं चक्षुष्मानपि याचते ।
अदृष्टमुखभङ्गस्य युक्तमन्धस्य याचितुम् ॥५

533 लक्ष्मीपयोधरोत्सेधकुङ्कुमारुणितो हरेः ।
बलिरेव स येनास्य भिक्षापात्रीकृतः करः ॥ ६॥

अथ रविः ।

534 रवेरेवोदयः श्लाघ्यः कोऽन्येषामुदयग्रहः ।
न तमांसि न तेजांसि यस्मिन्नभ्युदिते सति ॥१॥

535 तेजसा सह जातानां वयः कुत्रोपयुज्यते ।
बालस्यापि रवेः पादाः पतन्त्युपरि भूभृताम् ॥२॥

536 सहस्रकरतुष्ट्येव वाञ्छितात् प्राप्यतेऽधिकम् ।
परितुष्टैरपि पुनः किमन्यैर्द्विचतुःकरैः ॥३॥

537 मध्यस्थोऽपि जगच्छायां यस्त्वमेतां विलुम्पसि ।
अमध्यस्थः पुनर्भानो न विद्मः किं करिष्यसि ॥४॥

---

526 प. तदवस्थास्य । 528. ख. प्रतौ न विद्यते । 529. प. नालब्धमिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

538 आदित्येन द्विजेनेव दक्षिणाशावलम्बिना ।
न केवलमनेनात्मा दिवसोऽपि लघूकृतः ॥५॥

539 खद्योतो द्योतते तावद्यावान्नोदेति चन्द्रमा ।
उदिते तु सहस्रांशौ न खद्योतो न चन्द्रमा ॥६॥

540 उदेति रक्तः सविता रक्त एवास्तमेति च ।
संपत्तौ च विपत्तौ च महतामेकरूपता ॥७॥

**अथ सरः।**

541 कियद् गाधमगाधं वा गर्जं पृच्छ सरः सखे ।
अजः पिबति जानुभ्यां तीरस्थः नीरजं पयः ॥१॥

542 एकेनापि पुरा पीतः सागरः कुम्भयोनिना ।
सरस्तु रेच्यते नैतदपि तत्पितृकोटिभिः ॥ २॥

**अथ मृगः ।**

543 दुर्वाङ्कुरकुशाहारा स्तुत्यास्तात वने मृगाः ।
विभवोन्मत्तचित्तानां न पश्यन्ति मुखानि ये ॥१॥

544 अमृता विगतप्राणा सान्तःशल्या गतव्रणाः ।
अबद्धा निश्चला वास्ते कूटसंस्थे मृगे मृगी ॥२॥

**अथ धनिनः।**

545 भक्ते द्वेषो जडे प्रीतिरुचितं गुरुलङ्घनम् ।
मुखे कटुकता नित्यं धनिनां ज्वरिणां इव ॥१॥

546 आलिङ्गिताः परैर्यान्ति प्रस्खलन्ति समे पथि ।
अव्यक्तानि च भाषन्ते धनिनो मद्यपा इव ॥२॥

547 एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर ।
इत्थमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः ॥३॥

548 अर्थिता विभवस्त्यागः स्वातन्त्र्यमुचितज्ञता ।
इति पञ्चगुणोपेतमीश्वरं संश्रयेद् बुधः ॥४॥

---

539 ख० वाञ्छिता प्राप्यतेऽधिकम् । 540 प० उदये रक्तः । 541 ख० तीरस्थस्तीर्थे पयः । 542 ख० प्रतौ न विद्यते । 543 ख० प्रतौ अत्र न विद्यते । 545 ख० मुखे च कटुता । ख० प्रवितं गुरुलङ्घने । 546 प० आलिङ्गताः । प० अव्यक्तानि च ज्ञायन्ते । 548 प० स्वातंत्र्यमुपचितज्ञता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

549 प्रायेण धनिनां लोके धने तृष्णा गरीयसी ।
पश्य कोटिद्वयोपेतं लक्षाय प्रणतं धनुः ॥५॥

550 कोटिद्वयस्य लाभेऽपि नतं सद्वंशजं धनुः ।
शरस्त्ववंशजः स्तब्धो लक्षलाभस्य शङ्कया ॥६॥

551 या प्रकृत्यैव चपला निपतत्यशुचावपि ।
स्वामिनो बहु मन्यन्ते दृष्टिं तामपि सेवकाः ॥७॥

552 आक्षीरधारैकभुजामागर्भैकनिवासिनाम् ।
नमोऽर्थेभ्यः पृथक्त्वं ये भ्रातृणामपि कुर्वते ॥८॥

अथ दरिद्री ।

553 धर्मार्थकामहीनस्य परपिण्डान्नभोजिनः ।
काकस्येव दरिद्रस्य दीर्घमायुरनर्थकम् ॥१॥

554 हे दारिद्रय नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः ।
जगत्पश्याम्यहं येन न मां पश्यति कश्चन ॥२॥

अथ द्विकम् ।

555 द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ॥१॥

556 द्वाविमौ पुरुषौ लोके स्वर्गस्योपरि तिष्ठतः ।
प्रभुश्च क्षमया युक्तो दरिद्रश्च प्रदानवान् ॥२॥

557 द्वाविमावम्भसि क्षेप्यौ बद्ध्वा गाढं गले शिलाम् ।
धनिनं चाप्रदातारं दरिद्रं वातपस्विनम् ॥३

558 द्वाविमौ पुरुषौ लोके परप्रत्ययकारिणौ ।
स्त्रियः कामितकामिन्यौ लोकः पूजितपूजकः ।४

559 द्वाविमौ पुरुषौ लोके सुखिनौ न कदाचन ।
यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः ॥५

560 द्वाविमौ पुरुषौ लोके न भूतौ न भविष्यतः ।
प्रार्थितो यश्च कुरुते यश्च नार्थयते परम् ॥६

561 द्वाविमौ सर्वलोकानां शिरःशूलकरौ नरौ ।
गृहस्थश्च निरारम्भो यतिश्च सपरिग्रहः ॥७

---

552 ख० आक्षीरनीरैजभुजा० । प० ०मागर्भैकनिवासिनाम् । 559. ख प्रतौ न विद्यते ।
560. ख० 'न भूतो न भविष्यतः' ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ स्वानुभवः ।

562 दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्ररूपिणे ।
स्वानुभूत्यैकमानाय नमः शान्ताय तेजसे ॥१

563 मात्रां यस्योपजीवन्ति जलस्थलजनभश्च सः ।
तं स्वनिर्भासमात्मानं सानन्दं प्रणिदध्महे ॥२

564 याऽनुभूतिरजाऽमेयाऽनन्ताऽऽत्मानन्दविग्रहा ।
महदादिजगन्मायाचित्रभित्तिं नमामि ताम् ॥३

565 इक्षुक्षीररसादीनां माधुर्यस्यान्तरं महत् ।
भेदस्तथाऽपि नाख्यातुं सरस्वत्याऽपि शक्यते ॥४

566 काकोलूकनिशेवायं संसारोऽज्ञात्मवेदिनोः ।
या निशा सर्वभूतानामित्युवाच स्वयं हरिः ॥५

अथ वसन्तः ।

567 लतां पुष्पवतीं स्पृष्ट्वा कृतस्नानो जलाशये ।
पुनस्तत्सङ्गशङ्कीव वाति वायुः शनैः शनैः ॥१

568 वान्ति रात्रौ रतक्लान्तकामिनीसुहृदोऽनिलाः ।
ललनालोलधम्मिल्लमल्लिकामोदवासिताः ॥२

[ अमरुशतक, १२१ ]

569 किंशुकव्यपदेशेन तरुमारुह्य सर्वतः ।
दग्धादग्धान्यरण्यानि पश्यतीव विभावसुः ३॥

[ काव्यालंकार. २.९२ ]

570 यान्ति शरणं नार्यः स्वयमेव प्रियं जनम् ।
तद्वसन्तमदान्धस्य परपुष्टस्य चेष्टितम् ४॥

571 कोकिलश्चूतशिखरे मञ्जरीरेणुपिञ्जरः ।
गदितैर्व्यक्ततामेति कुलीनश्चेष्टितैरिव ५॥

572 नेयं विरौति भृङ्गाली मदेन मधुरस्वरा ।
अयमाकृष्यमाणस्य कन्दर्पधनुषो ध्वनिः ॥६

573 जलान्तान्नलिनीनाला हर्षसञ्जातकण्टकाः ।
मधुरं कोकिलागीतरवं श्रोतुमेवोत्थिताः ॥७

---

569 ० दग्धदग्धाम०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

574 परिचुम्बति संश्लिष्टो भ्रमरश्चूतमञ्जरीम् ।
नवसंगमसंहृष्टः कामी प्रणयिनीमिव ॥८

575 वने प्रियमपश्यन्ती चिरमन्विष्य कोकिला ।
प्रविष्टा बहु विक्रुश्य रक्ताशोकहुताशनम् ॥९

**अथ ग्रीष्मः ।**

576 फलितोदुम्बरान्तःस्था कलशब्दाऽपि कोकिला ।
न भात्यर्थपरैव स्त्री निषण्णा स्थविरोरसि ॥१

577 न प्रस्रवन्ति गिरयो घोरघर्माभितापिताः ।
नारीणामतिवृद्धानां जघनानीव साम्प्रतम् ॥२

578 कोटरान्तःप्रविष्टेन पावकेनेह पादपः ।
कृत्वा साधुरिवाकार्यमन्तर्दाहेन दह्यते ॥३

**अथ मेघः ।**

579 आस्ते वा भूभृतां मूर्ध्नि दिवि वा द्योततेऽम्बुदः ।
मरुद्भिर्लज्ज(?भज्य)मानोऽपि स किमेति रसातलम् ॥३

580 प्रावृण्मेघस्य मालिन्ये दोषः को भूरिवर्षणे ।
शारदाभ्रस्य शुचित्वं वद कुत्रोपयुज्यते ॥२

581 कुतोऽप्यागत्य घटते विघट्य क्वापि गच्छति ।
गतिर्न शक्यते ज्ञातुं घनस्य च घनस्य च ॥३

582 यानि त्वत्प्रार्थनाखिन्नैः पीतान्यश्रूणि चातकैः ।
हन्त तान्यपि नेदानीं क्षेप्योन्मेघ (?)किमुच्यते ॥४

**अथ शरत् ।**

583 बभूव गाढसंतापा मृणालवलयोज्ज्वला ।
उत्केव चन्दनापाण्डुघनस्तनवती शरत् ॥१

584 मयूरारावमुखरां प्रावृषं सतडिल्लताम् ।
महाटवीमिवोल्लङ्घ्य चापानि मुमुचुर्घनाः ॥२

585 दर्शयन्ति शरन्नद्यः पुलिनानि शनैः शनैः ।
नवसंगमसव्रीडा जघनानीव योषितः ॥३

---

574 प०'कामिनी प्रणयनीमिव' ॥ 575 ख० 'विक्रुष्टा'॥ 576 प० भात्यर्थपरेव ख० भात्यर्थीपरैव निषिण्णा 577 ख० घोरघर्मानिपातिता नारीणामपि वृद्धानां ॥ 579. ख० प्रतौ न विद्यते । 580. ख० प्रतौ अयं श्लोकः ५८१ श्लोकानन्तरं वर्तते । 581 प० विद्युत् यत्क्वापि । 581. ख प्रतौ न विद्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

586 शरद्युत्पन्नसंदेहा सरसो गगनस्य च ।
चातकाः सलिले पेतुः चक्रवाका नभो ययुः ॥४

अथ हेमन्तः ।

587 अव्युत्पन्नस्वभावानां नारीणामिव साम्प्रतम् ।
सीत्काराचार्यकं कर्तुमयं प्राप्तो हिमागमः ॥१

588 हे हेमन्त स्मरिष्यामि गते त्वयि गुणत्रयीं ।
अयत्नशीतलं वारि निशाश्च सुरतक्षमाः ॥२

589 कारणोत्पन्नकोपाऽपि साम्प्रतं प्रमदाजनः ।
निशि शीतापदेशेन गाढमालिङ्गति प्रियम् ॥३

590 नीहारपरुषाः लोकाः पृथिवी सस्यमालिनी ।
